6

Shreemad Bhagvatam

इति

Shastaskandhah (6)

षष्ठस्कंधः

अथ

षष्ठ स्कंधः

श्रीगणेशायनमः ॥ पुण्यारण्येन सिंहैकनाम सिंहो विराजते ॥ यन्नादतः पलायंते महत्कल्मषकुंजराः ॥ विसर्गसंभ
वान्जीवान्स्वमर्यादादिसंस्थितान् ॥ विष्णुपात्यखिलैः रूपैरित्येवं पंचमे स्थितं ॥ २ ॥ अध्यायैकोनविंशत्या षष्ठे पोषणमुच्यते
अतिलंघितमर्यादभक्तरक्षणलक्षणं ॥ ३ ॥ अजामिलो मनुष्येषु महापापी यथावितः ॥ विश्वरूपादिघातीयतथा देवेषु वास
वः ॥ ४ ॥ अजामिलस्य भक्तत्वं विष्णुदूतैर्निरूपितं ॥ संकेतभगवन्नामपुत्रस्नेहानुषंगजं ॥ ५ ॥ इंद्रोपि भगवद्भक्तः सख्येनोपें
द्रसेवकः ॥ तदधीनसुरैश्वर्यशत्रुनिर्ज्जयजीवितः ॥ ६ ॥ तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते ॥ विश्वरूपकथा षड्भि

राजोवाच ॥ निवृत्तिमार्गः कथित आदौ भगवता यथा ॥ क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥

रिंद्रद्रोषो कथ्यते ततः ॥ ७ ॥ इंद्रस्यैव तु दोषोक्तेः पुंक्त्वाख्यानं ततोऽष्टभिः ॥ द्वाभ्यां च महदाख्यानमेवं प्रकरणक्रमः
॥ तत्रादौ प्रथमे विघ्नो दूतैः पातकिमोचने ॥ तत्याप्रख्यापनायोक्तं याम्यैर्यद्दमीदिलक्षणं ॥ ८ ॥ अथ षष्ठमस्कंधो
व्याख्यायते ॥ पूर्वोक्तानुवादपूर्वकं निरंतरोक्तनरकपरिहारोपायं पृच्छति ॥ निवृत्तिमार्ग इति षड्भिः ॥ आदौ द्विती
तीयस्कंधे वैश्वानरं यातीत्यादिना ॥ भगवता त्वया यथा यथावत् ॥ येन मार्गेण क्रमेण योगेश्चिरादिप्राप्तिः तेनो
पलब्धो ब्रह्मा तेन सहासंसृतिर्मोक्षो भवति ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति
परंपदमिति वचनात् ॥ १ ॥

भा० ष० यस्मादेवं तस्मात्पापस्य निष्कृतौ प्रायश्चित्ते यतेत कदा मृत्योः पुरैव तत्रापि अविपद्यता अम्रियमाणेन देहेन
२ यद्वा ॥ अविपन्न विपत्तिरहितो यावत् ॥ यतात्मना संयतेन मनसा ॥ तत्रापि आशु अन्यथा चिरकाले तु द्विगुणं व्रतमर्ह
तीति हि गुरुत्वापत्तेः ॥ तत्र च पापस्य महत्त्वमल्पत्वं चावेक्ष्य तदनुरूपे प्रायश्चित्ते यतेत ॥ रुजां रोगाणां निदानवित्
यथा वैद्यः तदनुरूपं चिकित्सेत् तद्वत् ॥ ७ ॥ अत्र चोदयति द्वाभ्यां ॥ दृष्टराजदण्डादि श्रुतनरकपातादि ताभ्यामा

तस्मात्पुरैवाश्विह पापनिःकृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चि
कित्सेत रुजां निदानवित् ॥ ७ ॥ राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं ॥ करोति भूयो विवशः प्रा
त ३ यश्चित्तमथो कथं ॥ ८ ॥ क्वचिन्निवर्ततेऽभद्रात्क्वचिच्चरति तत्पुनः ॥ प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत् ॥ ९ ॥
श्रीबादरायणिरुवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते ॥ अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं ॥ १० ॥

त्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानन्तरं करोति ॥ अथो अतः कारणात् द्वादशाब्दादिकं प्रायश्चित्तं तेनास
भद्रात् २ मूलस्य दोषस्यानिवृत्तेः ॥ निवृत्तौ वा पुनश्च पापप्ररोहो योगादिति भावः ॥ किं च क्वचित्कदाचिदपापान्निवर्तते ॥ क्वचि
त्तदेव पुनराचरति यथा कुञ्जरः स्नातोऽपि रजोभिरात्मानं मलिनीकरोति ॥ तथा पापस्य पुनर्दुर्निवारत्वेन नरकपातस्या
परिहरति वश्यंभावित्वात्प्रायश्चित्तं व्यर्थमिति ॥ ९ ॥ कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाशः आत्यन्तिकः समू
लो न हीष्यते ॥ अविद्वान् अधिकारी यस्मिन् तस्य भावस्तत्त्वं तस्मात् ॥ अतोऽविद्याया नाशाभावान्नष्टेऽपि तस्मिन् पापे तत्संस्कारे
ण पापान्तरस्य पुनः प्ररोहो भवत्येव ॥ किं तर्हि मुख्यं प्रायश्चित्तं तदाह ॥ प्रायश्चित्तं तु विमर्शनं ज्ञानं ॥ १० ॥ २

त्रैगुण्यं स्वर्गादिसुखं तदेव विषयं प्राप्य यस्य न लीना प्रकृतिर्यस्मात्तस्य पुनः पुनर्गुणसर्गः ॥ भोगार्थदेहारंभरूपो मार्गः ॥
स च कथित ॥ तृतीये दक्षिणेन पथार्यम्णः पितृलोकं व्रजंतीति इत्यादिना ॥ ४ ॥ स्वनुवर्णिता निरन्तराध्याये ॥ ५ ॥ याख्या
तश्चतुर्थस्याद्यो यतः यस्मिन् ॥ ५ ॥ द्वीपादीन् भगवतो लक्षणतो मानतश्च परामंडलस्य संस्थानं ज्योतिषां विवराणां चेदं

प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ॥ योसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ १ ॥ अधर्मलक्षणा
नानानरकाश्चानुवर्णिताः ॥ मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥ २ ॥ प्रियव्रतोत्तानपादयोर्वंशास्त
च्चरितानि च ॥ द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ धरामंडलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां
विवराणां च यथेदमसृजद्विभुः ॥ ३ ॥ अधुनेह महाभाग यथैव नरकान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्या
ख्यातुमर्हसि ॥ ४ ॥ श्रीशुक उवाच ॥ न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ॥ ध्रुवं स
वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ५ ॥ संस्थानं विभुर्यथासृजत् तत् याख्यातमित्यर्थः
॥ ३ ॥ नानोग्रयातना येषु तान् नरकान् यथा येनोपायेन न नेयात् न गच्छेत् तन्मे अधुना व्याख्यातुमर्हसि ॥ ४ ॥ तत्र तावन्मन्वाद्यु
क्तं प्रायश्चित्तं विना नरका दुर्निवारा इत्याह ॥ न चेदिति द्वाभ्यां ॥ मनउक्तिपाणिभिः ॥ मनोवाक्कायैः कृतस्यांहसस्तैरेव
इहैवापचितिं प्रायश्चित्तं विनो कुर्याच्चेत्तर्हि पुरुषः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति ॥ मे मया भवतः कीर्तिताः ॥ तिग्मा दारुणा

॥ ३ ॥ [illegible]

तत्रहेतुःसध्रीचीनः॥समीचीनःअयंपंथाभक्तिमार्गःयतःक्षेमः॥क्षेमत्वेहेतुः॥अकुतश्चित्‌विघ्नादेर्भयंयस्मिन्‌॥तदेवाह॥
सुशीलाःकृपालवः॥साधवोनिष्कामाःयत्रयस्मिन्मार्गेधर्मनिष्ठाः॥अतोनज्ञानमार्गइवासहायतानिमित्तंभयंनापि
कर्ममार्गवत्‌॥मत्सरादियुक्तेभ्योभयमितिभावः॥१५॥भक्तेरन्यनिरपेक्षत्वमुक्तंकृच्छ्रादीनितुभक्तिंविनानशोधयंतीत्याह

सध्रीचीनोह्ययंलोकेपंथाःक्षेमोऽकुतोभयः॥सुशीलाःसाधवोयत्रनारायणपरायणाः॥१५॥प्रायश्चित्ता
निचीर्णानिनारायणपराङ्मुखम्‌॥ननिष्पुनंतिराजेंद्रसुराकुंभमिवापगाः॥१६॥सकृन्मनःकृष्णपदारविंद
योर्निवेशितंतद्गुणरागियैरिह॥नतेयमंपाशभृतश्चतद्भटान्स्वप्नेपिपश्यंतिहिचीर्णनिष्कृताः॥१७॥अत्र
चोदाहरंतीममितिहासंपुरातनं॥दूतानांविष्णुयमयोःसंवादंतन्निबोधमे॥१८॥कान्यकुब्जेद्विजःकश्चिद्दा
सीपतिरजामिलः॥नाम्नानष्टसदाचारोदास्याःसंसर्गदूषितः॥बंध्यक्षकैतवैश्चौर्यैर्गर्हितांवृत्तिमाश्रि
तः॥बिभ्रत्कुटुंबमशुचिर्यातयामासदेहिनः॥१९॥एवंनिवसतस्तस्यलालयानस्य [illegible] तत्सुतान्‌॥कालो
ऽत्यगान्महान्राजन्नष्टाशीत्यायुषःसमाः॥२०॥

न॥प्रायश्चित्तानीति॥महत्ताप्यशोधकत्वेदृष्टांतमाह॥सुराकुंभमापगाइवेति॥१६॥भक्तिःसत्यापिपुनात्येवेत्याह
सकृदिति॥तस्यगुणेषुरागमात्रमस्तिनतुज्ञानंयस्यतन्मनः॥तावतैवचीर्णंनिःकृतंप्रायश्चित्तंयैः॥१७॥इममर्थ
मितिहासेनोपपादयति॥अत्रचेति॥मेमत्तः॥१८॥कान्यकुब्जपुरेदास्याःपतिर्नाम्नाअजामिलः॥बंदीग्रहेणअक्षैश्चद्यूते
नकैतवैर्वंचनादिभिश्चौर्यैर्वृत्तिंजीविकांबिभ्रत्‌पुष्णन्‌॥यातयामास॥पीडयामास॥१९॥आयुषःसंबंधीमहान्कालोऽ

तत्तुनित्यप्रमत्तः शनैर्लभते नान्य इति सदृष्टांतमाह नैतीति ॥ पथ्यमेवान्नमश्नतः पुरुषान्यथा व्याधयो निबाधंते
तथा नियमादिकर्त्ता क्षेमाय तत्त्वज्ञानाय समर्थो भवतीति ॥ ११ ॥ एतदेव विशदयति द्वाभ्यां ॥ तपसा एकाग्र्येण मनस
इंद्रियाणां च ऐकाग्र्यं परमं तप इति स्मृतेः ॥ ब्रह्मचर्येणाष्टांगेन ॥ तदुक्तं ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्ट

नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंति हि ॥ एवं नियमकृद्राजन्शनैः क्षेमाय कल्पते ॥ ११ ॥ तपसा
ब्रह्मचर्येण शमेन च दमेन वा ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ देहवाग्बुद्धिजं धीरा ध
र्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥ १२ ॥ केचित्केवलया भक्त्या वासुदे
वपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥ १३ ॥ न तथा ह्यघवान्राजन्पूयेत तप
आदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १४ ॥

लक्षणमिति ॥ शमो मनसो नियमनं दमो बाह्येंद्रियाणां त्यागो दानं यमोऽहिंसादिः ॥ १२ ॥ अस्यातिदुष्करत्वात्सुखमेवा
न्यत्प्रायश्चित्तमाह ॥ केचिदित्यनेनैवंभूता भक्तिप्रधाना विरला इति दर्शयति ॥ केवलया तपआदिनिरपेक्षया ॥ वासुदे
वपरायणा इति ॥ नाधिकारिविशेषणमिति मंतव्यं ॥ किं त्वन्येषामश्रद्धया तत्राप्रवृत्तेरर्थात्तेषामघपर्यवसानादनुवादमा
त्रम् ॥ १३ ॥ एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह ॥ न तथा पूयेत [illegible] तत्पुरुषनिषेवया कृष्णेऽर्पिताः प्राणा येन ॥ १४

छे

वयं युष्मान् न जानीम इति न कोपः कार्यः॥ यतो लौकिकाकृतिरूपा यूयमित्याहुः॥ सर्वे इति सार्द्धाभ्यां॥ लसत्यः पुष्कर
मालाः स्रजो येषां॥ नूत्नं नवं वयो येषां॥ निषंग इषुधिः धनुर्निषंगादिभिः श्रीः शोभा येषां॥ विगतं तिमिरं यत्रालोकश्चा
न्ये प्रकाशो याभ्यः यास्तु वा तथाभूताः दिशः कुर्वंतः॥ भवतामेतदनुचितमित्याहुः॥ किमर्थमिति॥३०॥ अहो दंड्याद्दंड्या

सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः॥ धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः॥ दिशो वितिमि
रालोकाः कुर्वंतः स्वेन रोचिषा॥ किमर्थं धर्मपालस्य किंकरान्नो निषेधथ॥३०॥ श्रीशुक उवाच॥ इत्युक्ता
यमदूतैस्ते वासुदेवोक्तकारिणः॥ तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा॥३१॥ विष्णुदूता ऊचुः॥
यूयं वै धर्मराजस्य यदि निर्देशकारिणः॥ ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम्॥३२॥ कथं स्विद्ध्रिय
ते दंडः किं वास्य स्थानमीप्सितम्॥ दंड्याः किं कारिणः सर्वे आहो स्वित्कतिचिन्नृणाम्॥३३॥

दिष्टा नभृत्याः एते चौरा एव॥ अस्मद्धिया धर्मराजस्य किंकरा इत्यन्ये तं वदंतीति विस्मयेन प्रहस्य तान् प्रत्यू
चुः॥ मेघस्येव निर्ह्रादो ध्वनिर्यस्याः तया॥ ३१॥ तत्त्वं स्वरूपम्॥ प्रमाणम्॥ लक्षणम्॥ ३२॥ कथं स्वित् केन प्र
कारेण॥ स्थानं विषयः॥ कारिणः कर्मिणः॥ नृणामिति नरा एव पश्वादयः॥ तेष्वपि कतिचिदेवेत्यर्थः॥ ३३॥

प्रवयसः वृद्धस्य ॥ २१ ॥ बद्धं हृदयं येन ॥ जरठो वृद्धः ॥ २२ ॥ एतच्च तदुपलालनादि श्रीनारायणनामोपचारमाहात्म्येन इति
देवाभूदि[illegible]ति सिद्धांतो पद्ययोगित्वेनापि द्रष्टव्यं ॥ २३ ॥ २४ ॥ वक्राणि तुंडानि मुखानि येषां ॥ ऊर्ध्वानि रोमाणि येषां तान् ॥ प्ला

प तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ॥ बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं ॥ २१ ॥ स बद्धहृदयस्तस्मि
न्नर्भके कलभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं ॥ २२ ॥ भुंजानः प्रपिबन् खादन् बालकं स्नेह
यंत्रितः ॥ भोजयन् पाययन् मूढो न वेदागतमंतकं ॥ २३ ॥ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ॥ मतिं चका
र तनये बाले नारायणाह्वये ॥ २४ ॥ स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषान् भृशदारुणान् ॥ वक्रतुंडानूर्ध्वरोम्ण
आत्मानं नेतुमागतान् ॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयं ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः
॥ २५ ॥ निशम्य म्रियमाणस्य मुखतो हरिकीर्तनं ॥ भर्तुर्नाम महाराज पार्षदाः सहसापतन् ॥ २६ ॥ विकर्षतों
तर्हृदयाद्दासीपतिमजामिलं ॥ यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥ २७ ॥ ऊचुर्निषेधितास्तांस्ते वै
ध ववस्वतपुरःसराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ॥ २८ ॥ कस्य वा कुत आयाताः कस्मादस्य
निषे[illegible]धथ ॥ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥
किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥ २९ ॥
वितेन प्लुतत्वं नीतेन ॥ २५ ॥ हरिकीर्तनं निशम्यापतन्नित्यन्वयः ॥ पतत्सु भर्तुर्नाम ॥ २६ ॥ २७ ॥ २८ ॥ पुरःसराः भृत्याः ॥ २८ ॥
अस्य नयनं निषेधथ ॥ २९ ॥

भा० ष० स्यानमाहुः ॥ एतैर्निमित्तभूतैः विज्ञातः दंड्यानाहुः ॥ स चेदिति ॥ ४७ ॥ विपरीतान्यभद्राण्यकर्मण्यं संभवंति
५ यतस्तेषां गुणसंयोगोऽस्ति ॥ यदि कश्चिदकर्त्ता स्यात्तर्हि तस्याभद्राणि न स्युः न चैतदस्तीत्याहुः ॥ न हि देहवानक
र्मीकृदस्तीति ॥ अतः सर्वैः कर्मिणः कर्मिणं च पापावश्यंभावित्वात्ते सर्वे दंडमर्हंतीत्यर्थः ॥ ४ ॥ कथंचिद्धि यत्ते दंड
कृत्यस्योत्तरं येनेति ॥ धर्मो वेति दृष्टांतः ॥ अधर्मानुसारेण सुखवदित्यर्थः ॥ ४८ ॥ न केवलं सूर्यादय एव ज्ञापकाः
किं त्वर्थापत्तिरपीत्याहुः ॥ यथेति देहे देवप्रवराः ॥ इह जन्मनि प्राणतयोरमूढत्वेन वा सुखिदुःखिमिश्रत्वेन वा धर्मकर्तृ

रेतैर धर्मोऽभिज्ञातः स्यान् दंडस्य युज्यते ॥ सर्वैः कर्मानुरोधेन दंडमर्हंति कारिणः ॥ ४९ ॥ संभवंति हि
भद्राणि विपरीतानि चानघाः ॥ कारिणां गुणसंगोऽस्ति देहवान्नह्यकर्म्मकृत् ॥ ४९ ॥ येन यावान् यथा
व३ धर्मोऽधर्मो वेह समीहितः ॥ स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ॥ ४९ ॥ यथेह देवप्रवरास्त्रैविध्यमुप
लभ्यते ॥ भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ॥ ५० ॥ वर्त्तमानोऽन्ययोः कालो गुणाभिव्यापको यथा
॥ एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनं ॥ ५१ ॥
दिना वा त्रैविध्यं ॥ भूतेषु यथोपलभ्यते ॥ तथान्यत्र जन्मांतरे त्वनुमीयते ॥ त्रैविध्यान्यथानुपपत्त्या कल्प्यते ॥ ५०
वर्त्तमानजन्मना एवं पूर्वजन्मधर्माधर्मज्ञानं भवतीति सदृष्टांतमाहुः ॥ वर्त्तमानो वसंतादिकालः ॥ अन्ययोर्भू
तभविष्ययोर्वसंतयोर्ये गुणाः ॥ पुष्पफलादयः तेषामभिज्ञापको यथा एवमेतज्जन्म ॥ अन्ययोर्भूतभवि
ष्यज्जन्मनोः धर्माधर्मौ निदर्शयतीति तथा ॥ ५२ ॥ ॥ ५ ॥

वेदेनप्रणिहितोविहितोधर्मः वेदप्रमाणकइत्यर्थः ॥ अनेनयोवेदप्रमाणकः ॥ धर्मःसवेदप्रमाणकइतिस्वरूपंप्रमा
णंचोक्तं ॥ यथाहजैमिनिः ॥ चोदनालक्षणोधर्मइतिव्याख्यातंचभट्टैः ॥ इयमेकेनसूत्रेणाश्रुत्यर्थाभ्यांनिरूपितइति ॥ अ
पृष्टस्याप्यधर्मस्यस्वरूपंलक्षणंचदंडस्थानकथनायाहुः ॥ तद्विपर्य्ययोयोवेदनिषिद्धःसोधर्मोनिषेधश्चतस्मिन्प्र
माणमित्यर्थः ॥ वेदस्यप्रामाण्यत्वेहेतुः ॥ वेदोनारायणादुद्भूतःसएवसाक्षादित्युपचारः ॥ स्वयंभूरितिचनिश्वासमात्रेण
स्वयमेवभवतीति ॥ तथाचश्रुतिः ॥ अस्यमहतोभूतस्यनिश्वसितमेतदृग्वेदइति ॥ ४० ॥ कोसौनारायणस्तत्राहुः ॥ येन

यमदूता ऊचुः ॥ वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्य्ययः ॥ वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम ॥ ४० ॥
येनस्वधाम्न्यमीभावारजःसत्वतमोमयाः ॥ गुणनामक्रियारूपैर्विभाव्यंतेयथातथं ॥ ४१ ॥ सूर्य्योग्निः
खंमरुद्देवःसोमःसंध्याहनीदिशः ॥ कंकुकालोधर्मइतिह्येतेदैह्यस्यसाक्षिणः ॥ ४२ ॥

स्वधाम्निस्वस्वरूपेअमीभावाः ॥ प्राणिनः ॥ गुणाःशांतत्वादयः ॥ नामानिब्राह्मणइत्यादीनि ॥ क्रियाश्चाध्ययनाद्याः
रूपाणिवर्णाश्रमादीनि ॥ तैर्विभाव्यंतेविविच्यंते ॥ यथातथंसनारायणः ॥ ४१ ॥ तथाप्यधर्मोनेनकृतइतिकुतोज्ञाय
तेतत्राहुः ॥ सूर्य्यइति ॥ अहनी ॥ अहश्चरात्रिश्च ॥ कंउदकं कुःपृथ्वी ॥ देहस्यजीवस्ययथाहुः ॥ आदित्यचंद्रावनिलोऽ
नलश्चद्यौर्भूमिरापोहृदयंयमश्च ॥ अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति ॥ ४२ ॥ ११

भा० ष० नेहत्र अनिच्छन्नपि अनेनैव कर्माणि कार्य्यते कोशकारः कीटविशेषः मुह्यति निर्गमोपायं न जानाति ॥ ६६ ॥ कार्य्य
६ ते इत्यत्रानुभवं प्रमाणयति ॥ न हीति ॥ गुणैर्गुणकार्य्यैर्दिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ॥ ६७ ॥ कर्मवशे
नचत्तदनुरूपो देहो भवतीत्याह ॥ लब्ध्वेति ॥ अव्यक्तं अदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं [illegible] तदनुरूपं स्थूलं
सूक्ष्मंच शरीरं भवति ॥ यथा योनि मातृसदृशं ॥ यथा वीजं पितृसदृशं ॥ स्वभावो वासना शुक्रशोणितयोरेकोत्वे

देहस्थोऽजितषड्वर्गो नेहत्र कर्माणि कार्यते ॥ कोशकारइवात्मानं कर्मणा छाद्य मुह्यति ६६
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्य्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ६७ ल
ब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ॥ यथा योनि यथा वीजं स्वभावेन बलीयसा ६८ एष प्रकृ
तिसंगेन पुरुषस्य विपर्य्ययः ॥ आसीत्स एव न चिरादीशसंगाद्विलीयते ६९ अयं हि श्रुतसंपन्नः शी
लवृत्तगुणालयः ॥ धृतव्रतोऽस्पृहो दान्तः सत्यवान्मंत्रविच्छुचिः ६६

पि कर्मैवासनया मातृपितृसदृशो देहो भवतीत्यर्थः ॥ ६९ ॥ संसारचक्रमुपसंहरन् मुक्तिप्रकारमाह ॥ एष इति
ईशसंगात् ॥ परमेश्वरभजनात् ॥ ६९ ॥ तदेवं सामान्यतो धर्मादितो धर्मादिनिर्णयं मुक्त्वा प्रस्तुतस्याजामिल
स्य धर्मं प्रपंचयन्नोद्दंडात्वमाह ॥ अयं हीति यावदध्यायसमाप्तिः ॥ तत्र द्वाभ्यां तत्पूर्ववृत्तानुवादो न्या श्री
यातिरेकप्रदर्शनार्थः ॥ शीलं सत्वभावः ॥ वृत्तं महाचाराः गुणाः दमादयः तेषामालयः ६

अयं पंचधर्माधर्मज्ञानप्रकारोन्येषां धर्मराजस्तु मनसैव सर्वं पश्यतीत्याह ॥ पुरे संयमन्यां स्थित एव देवो यमः दे-
हेस्थितोऽन्तर्यामी वा जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं विशेषेण पश्यति ॥ अनु अनंतरम पूर्वरूपं मीमांसते पूर्वस्या-
नुरूपं तद्विचारयति यतोसौ भगवान् अजः ॥६४॥ जीवस्तु ईश्वरेणोपस्थापितं वर्तमानं देहं पश्यति ॥ ननु पूर्वमपरं चेत्या-
ह ॥ यथेति ॥ अज्ञः अविद्योपाधिजीवस्तु व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्तमानमेव देहमुपास्ते ॥ अहमिति मन्य-
ते ॥ पूर्वमपरं वा न वेद अत्र हेतुः ॥ नष्टा जन्मनः स्मृतिर्यस्य ॥ अत्र दृष्टांतः ॥ तमसा निद्रया युक्तो यथा स्वप्ने अभिव्यक्तमे-

मनसैव पुरे देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसते पूर्वं मनसा भगवानजः ॥६४॥ यथाज्ञस्तमसा यु-
क्त उपास्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥६५॥ पंचभिः कुरुते स्वार्थान् पंच वेदाथ पं-
चभिः ॥ एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ॥६६॥ तदेतत् षोडशकलं लिंगं शक्तित्रयं महत् ॥ धत्ते
नसंसृतिं पुंसि हर्षशोकभयार्त्तिदां ॥६७॥

वदेहाद्युपास्ते ॥ न तु जाग्रद्देहादि पूर्वं स्वप्नादिगतं वा तद्वदित्यर्थः ॥६५॥ एवंभूतस्य जीवस्य संसारं प्रपंचयति पंच-
भिः श्लोकैः ॥ पंचभिः कर्मेंद्रियैः स्वार्थान् उपादानादीन् ॥ पंच शब्दादीन् वेद ॥ पंचभिर्ज्ञानेंद्रियैः ॥ षोडशेन मनसा सह
सप्तदशः ॥ षोडशी वाध्यंतर्गतोपि स्वयं त्वेक एव सर्वेंद्रियविषयप्रतिसंधानात् ॥ त्रीन् ज्ञानकर्मेंद्रियमनोवि-
षयान् प्राप्नोति ॥६६॥ तदेतल्लिंगशरीरं शक्तित्रयं गुणत्रयकार्यं महदहमादि पुंसि जीवे अनुसंसृतिं धत्ते ॥६७॥

तदघरूपमायुर्यस्य ॥ मलमेव तत् दीयमन्नादिकमत्तीति मलात् ॥ ६ ॥ अकृतनिर्वेशं अकृतप्रायश्चित्तं ॥ अस्यैव हितार्थिने
व्यामनूद्याहुः ॥ यत्रेति द्वाभ्यां ॥ इति षष्ठे प्रथमः ॥ १ ॥ द्वितीये वैष्णवैर्याम्यान्नाममाहात्म्यमद्भुतं ॥ श्रावयित्वा द्विजो विष्णोर्लो
कं नीत इतीर्यते ॥ नयकोविदाः न्यायनिपुणाः ॥ १ ॥ धर्मद्रष्टॄणां सभाम धर्मः स्पृशतीति तदाहुः ॥ यत्र सभायां धर्मद्रष्टृभिः ते
यदसौ शास्त्रमुल्लंघ्य स्वैरचार्य्यार्यगर्हितं ॥ अप्रवर्त्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६ ॥ ततः एनं दंडपाणेः स
काशं कृतकिल्बिषं ॥ नेष्यामोऽकृतनिर्वेशं यत्र दंडेन शुद्ध्यति ॥ ७ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे अ
जामिलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ बादरायणिरुवाच ॥ एवं ते भगवद्दूता यमदूताभिभाषितं ॥ उपधार्या
थाहुस्तान्नयकोविदाः ॥ १ ॥ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां ॥
यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा ॥ २ ॥ प्रजानां पितरो ये च शास्तारः साधवः समाः ॥ यदि स्यात्ते
षु वैषम्यं कं यांति शरणं प्रजाः ॥ ३ ॥ यद्यदाचरति श्रेयानितरस्तत्तदीहते ॥ स यत्प्रमाणं कुरुते लोक
स्तदनुवर्त्तते ॥ ४ ॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥ स
कथं न्यर्पितात्मानं कृतमैत्रमचेतनं ॥ विस्रंभणीयो भूतानां सघृणो दोग्धुमर्हति ॥ ६ ॥

णां सभां ॥ २ ॥ पितरः पितृवत्पालकाः ॥ शास्तारः अनुशिक्षकाः ॥ वैषम्यं दंड्यादंडनं ॥ ३ ॥ एतत्प्रवर्त्तितं समधर्मं
मन्योऽपि करिष्यतीति महत्कष्टमभूदित्याहुः ॥ यद्यदिति ॥ श्रेयान् श्रेष्ठः ॥ ४ ॥ विस्रब्धस्तत्रापि तादृशि त्याहुः ॥ परस्येति

कामाभ्यां निवृत्तो निश्चिंतः ॥ विश्वासेन नितरामर्पितवा
नात्मा येन तं ॥ विस्रंभणीयः ॥ विश्वसनीयः सघृणश्चेत् ॥ ६ ॥

निरहंकृतो निरहंकारः ॥ ५७ ॥ आवृत्तः वनात्पुरा वृत्तः ॥ ५८ ॥ भुजिष्यया भोगस्त्रिया दास्या ॥ मैरेयं मधु पैष्टी सुरां
पिबता मदेन घूर्णिते संभ्रांते नेत्रे यस्याः ॥ ५९ ॥ विशेषेण श्लथं नीवी यस्याः ॥ तया सह व्यपेतं साचाराद्भ्रष्टं ॥ ६० ॥ कामोद्दीप

निर २ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥ एकदासौ वनं या
तः पितृसंदेशकृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥ ददर्श कामिनं कंचिच्छूद्रं सह
भुजिष्यया ॥ पीत्वा च मधु मैरेयं सदा घूर्णितनेत्रया ॥ ५९ ॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम् ॥ क्री
डंतमनुगायंतं हसंतमनयांतिके ॥ ६० ॥ दृष्ट्वा तां कामलिप्तेन बाहुना परिरंभ्यतां ॥ जगाम हृच्छयवशं यवुसे
व विमोहितः ॥ ६१ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतं ॥ न शशाक समाधातुं मनो मदनवेपि
तं ॥ ६२ ॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ॥ ६३ ॥ तामेव तो
षयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥ विप्रां स्वभार्यामप्रौढां
कुले महति लंभितां ॥ विससर्जाचिरात्पापः स्वैरिण्यपांगविद्धधीः ॥ ६५ ॥ यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो
धनम् ॥ वभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयम् ॥ ६६ ॥
केन तद्गणरागेण हरिद्रादिना लिप्तेन ॥ ६१ ॥ सत्वं धैर्यं श्रुतं ज्ञानं तद्बलेन स्तंभयन्नपि ॥ मदनेन कंपितं मनसः समा
धातुं नतोऽभूत् ॥ तद्दर्शनमेव निमित्तं यस्य ॥ स्मरव्याजस्य ग्रहस्य तेन ग्रस्तः ॥ विचेतनः सो गतस्मृतिः ॥ ६२ ॥ यावता स

भा० ष०
८

ननुकामत्तः।कृत्तानां वहूनां महापात्तकानां सहस्रशः।प्रावर्त्तिनां द्वादशाद्वादिकोटिभिरप्यनिवर्त्यानां क
थमिदमेकमेव प्रायश्चित्तं स्यात्तत्राह।तेन इति द्वाभ्यां॥९॥मुनिकृतं श्रेष्ठं प्रायश्चित्तमिदमेव।तत्र हेतुः
यतो नाम व्याहरणात्।तद्विषया नामोच्चारकपुरुषविषया मदीयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भव
ति॥१०॥श्रेष्ठत्वमेवोपपादयंति नेति द्वाभ्यां।ब्रह्मवादिभिर्मन्वादिभिः।निष्कृतैः।तथा न शुद्ध्यति।उदाहृतैर्हरि

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः।स्त्रीराजपितृगोहंता ये च पातकिनोपरे॥९॥सर्वेषा
मप्यघवतामिदमेव सुनिःकृतं।नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः॥१०॥न निष्कृतैरुदितैर्ब्र
ह्मवादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः।यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलं
भकं॥११॥नैकांतिकं तद्धि कृतेपि निष्कृते मनः पुनर्धावति चेदसत्पथे।तत्कर्मनिर्हारमभीप्सतां
हरेर्गुणानुभावः खलु सत्वभावनः॥१२॥

तेर्यथा नामपदैर्नमामीत्यादिक्रियायोगेन नाम्ना पे ह्रितैरिति दर्शितं।किंच।तन्नामोच्चारणं उत्तमश्लोक
स्य गुणानां चोपलंभकं ज्ञापकं भवति।न तु कृच्छ्रचांद्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः॥११॥
नैकांतिकं नात्यंतशोधकं।तन्निःकृतं यस्मिन्।कुतो यतः सत्यपि पापमार्गे मनो धावति चेत्।कर्मणां पा
पानां निर्हारं आत्यंतिकं नाशमिच्छतां।हरेर्गुणानुवाद एव प्रायश्चित्तं यतोसौ खलु सत्वभावनः चित्तशो

८

नत्वस्य पापिनो दंडं किमर्थमाक्रोशः क्रियते तत्राह ॥ अयं हीति ॥ यद्यस्माद्धि वशोपि हरेर्नो म व्याजहार उच्चारि
तवान् ॥ केवलप्रायश्चित्त मात्रं हरेर्नाम अपि तु स्वस्त्ययनं मोक्षसाधनमपि सकृदुच्चरितं येन हरिरित्यक्षरद्वयं व
द्धः परिकरस्तेन मोक्षाय गमनं प्रतीतिस्मृतेः ॥ ७ ॥ ननु कर्मसाद्गुण्यकरं हरेर्नामेति युक्तं ॥ यस्य स्मृत्या च नामोक्त्या
तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमित्यादिवचनात् ॥ स्वातंत्र्येण त्वघनिवर्तकं ह
रेर्नामकथं स्यात् तत्राह ॥ एतेनैवेति ॥ अघोनः अघवतः ॥ मघवच्छब्दवद्रूपं यतः आ इति छेदः ॥ आईषत् ॥ आ
भासमात्रं चतुरक्षरं इति यन्नाम जगाद ॥ एतेनैव लोचनतुरक्षरमित्यनेनाद्धि कं च दर्शितं ॥ कथं जगाद ॥ नार

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥ एतेनैव ह्यघो
नोस्य कृतं स्यादघनिःकृतं ॥ यदा नारायणायेति जगाद चतुरक्षरं ॥ ८ ॥

यण आय आगच्छ इत्येवं विक्रोशरूपेण
पुत्राह्वानेन ॥ अयं भावः कर्मांगत्वेपि हरिनाम्नः स्वादरत्यादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं युक्तमेव त
थाहि ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिभिः ॥ पुराणेषु ता
वत्सहस्रशो नाम्नः स्वातंत्र्यमवगम्यते ॥ न चैतेऽर्थवादा इति शंकनीयं ॥ विधिशेषत्वाभावात् न च विध्यश्रवणाद
न्यपेक्षता कल्पनीया ॥ यदाग्नेयोष्टाकपालो भवतीत्यादिवदप्राप्तार्थत्वेन ॥ विधिकल्पनोपपत्तेः ॥ मंत्रेषु मंत्रा अस्य म
र्त्या स्यतेभ हरिनाममहे चित्प्रासो जातवेदसः ॥ अस्य जानंतो नाम चिद्विविक्तन इत्यादिषु नाम्नस्तयोपादानादि स
वीधिकमवगम्यते ॥ उपपादितं च मंत्रार्थादानामपि स्वार्थप्रामाण्यं देवताधिकरणे ॥ तस्मात् श्रीनारायणनामाभा

ष१९

भा० ष० किंच तैस्तपोदानादिभिस्तान्यघा[illegible]न्येव पूयंते न श्यंति ॥ अधर्मोऽज्ञातं मलिनं तत्तस्य पापकर्तुर्हृदयं ॥ य
९ द्वा तेषामघानां हृदयस्थं तत्स्वरूपसंस्काराख्यं न मुच्यति ॥ तदपीशांघ्रिसेवया कीर्तनादि शुध्यतीत्यर्थः ॥ अ
यभावः ॥ महांत्यपि पापानि सकृदुच्चारितेनैव नाम्ना न पश्यति ॥ सकृत्प्रवर्तितेन दीपेनैव गाढध्वांता
नि ॥ तदा प्रत्यावृत्तपापांतरस्यानुपपत्तेः ॥ दीपकधारणे इव तमोंतरस्यात् ॥ ततश्च वासनाक्षयात् हृद
यशुद्धिः ॥ एतदर्थमेव तत्र तत्रावृत्तिविधानं पापक्षयश्च भवति स्मरतां तमहर्निशमित्यादिषु ॥ तेद
वाद्यप्युक्तं ॥ गुणानुवादः खलु सत्त्वभावनः ॥ तदपीशांघ्रिसेवयेति च ॥ अतोऽस्य हरिनाम्नैव सर्वपापक्षयः

तैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥१६॥ अज्ञानादथ
वा ज्ञानादुत्तमश्लोकनाम यत् संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥१७॥ यथागदं वीर्यतमम
उपयुक्तं यदृच्छया ॥ अज्ञानतोऽप्यात्मगुणं कुर्यान्मंत्रोऽप्युदाहृतः ॥१८॥

वासनाक्षयस्तु महापुरुषदर्शनादिभिरिहीनतथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राह ॥
अज्ञानादिति ॥ बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥१७॥ नन्विदमपि पापं दहतु दि
त्री ३ दृष्टफलदाही न कथं प्रायश्चित्तं स्यात्तत्राह ॥ यथेति ॥ अगदमौषधं वीर्यतमं निश्चितवीर्यं तममित्युक्तं य
दृच्छया श्रद्धादिहीनं उपयुक्तं ॥ नन्विदं पथ्यं तु स्वादज्ञानतोऽप्यस्य गुणमारोग्यं कुर्यात् मंत्रोऽपि नामात्मकस्त
थात्मकार्यं कुर्यादेव ॥ न हि वस्तुशक्तिः ॥ श्रद्धादिकमपेक्षतेऽत्यर्थः ॥ तदुक्तं विष्णुधर्मेषु ॥ हरिर्हरति पापानि दुष्ट
चित्तैरपि स्मृतः ॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः इति ॥१८॥ ९

अथ तस्मादेनं मा अपमार्गेणैनं यत्त्कृतमशेषाणामघानां निःकृतं येन ॥ यस्मात्स मग्रहीत् संपूर्णमुच्चारित
वान् ॥ नामैकदेशेनाप्यलमिति भावः ॥ म्रियमाण इत्यनेन पुनः पापांतरासंभव उक्तः ॥ न च तत्कालत्वमेव वि
वक्षितं ॥ तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात् ॥ न च विधिं विना काकतालीयन्यायेन नामोच्चारणं
पापहरमिति प्रमाणमस्ति ॥ नन्वयं पुत्रनामाग्रहीन्न तु भगवन्नामेत्यत्राह ॥ सांकेत्यं पुत्रादेः संकेतितं पारिहास्यं
परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं ॥ विष्णुनेति सावज्ञमपि चेवैकुंठनामोच्चारणं ॥ १३ ॥ नन्वनायं स

अथैनं मापनयत कृताशेषाघनिष्कृतं ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ सांकेत्यं पारिहा
स्यं वा स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥ पतितः स्खलितो भग्नः संदष्ट
स्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनां ॥ १५ ॥ गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्राय
श्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥

कल्पपूर्वकं वैकुंठनामाग्रहीत् ॥ किं तु पुत्रस्नेहपरवशः सन् तत्राह ॥ पतित इति ॥ अवशेनापि यो हरिरित्याह स यात
नां नार्हतीति ॥ पुमानित्यनेनात्र वर्णाश्रमादिनियमः त्युक्तः ॥ अवशत्वमेवाह ॥ पतितः प्रासादादिभ्यः ॥ स्खलितो मा
र्गे भग्नो भग्नगात्रः संदष्टः सर्पादिभिस्तप्तो ज्वरादिना ॥ आहतो दंडादिना ॥ १४ ॥ ननु महतः पापस्य महदेव प्राय
श्चित्तं युक्तं न त्वल्पं ॥ नामग्रहणमात्रं पापनाशनमल्पेन कृच्छ्रादिना तारतम्यवत्तत्राह ॥ द्वाभ्यां गुरूणां पापानां गुरूणि
प्रायश्चित्तानि लघूनां च लघूनीति तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि ॥ अतस्तत्र तथैव व्यवस्था हरिनाम्नस्तु न
व्यवस्थोक्ता ॥ विहितः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् ॥ न च सुराबिंदुपाने महापातकत्वं स्मर
रत्व नाम्नस्तत्प्रायश्चित्तस्मरणस्या यामितिभावः ॥ १५ ॥

घ्रा:

भा० ष०
१०

नास्त्यन्यंवंधुःपुत्रादिर्ययोः ॥ तपस्विनौसंततौ ॥ अधुनाततस्तएमेव ॥२७॥ २८ ॥ रत्यानीतस्यविमर्शपूर्वकंमोक्षक
ममाह किमिदमित्यष्टभिः ॥ साक्षात्प्रत्यक्षमिहजाग्रतेवदृष्टं ॥२९॥ येमांव्यमोचयन् ॥ तेचक्वगताः ॥३०॥ यद्यप्यहममि
वृद्धावनाथौपितरौनान्यवंधूतपस्विनौ ॥ अहोमयाधुनात्यक्तावकृतज्ञेननीचवत् ॥३१॥ सोहंव्यक्तंपतिष्या
मिनरकेभृशदारुणे ॥ धर्मघ्नाःकामिनोयत्रविंदंतिसमयातनाः ॥३२॥ किमिदंस्वप्नआहोस्वित्साक्षाद्दृ
ष्टमिहाद्भुतं ॥ क्वयातास्त्रद्यतेयेमांव्यकर्षन्पाशपाणयः ॥३३॥ अथतेक्वगताःसिद्धाश्चत्वारश्चारु
दर्शनाः ॥ व्यमोचयन्नीयमानंवध्वापाशैरधोभुवः ॥३४॥ अथापिमेदुर्भगस्यविबुधोत्तमदर्शने ॥
भवितव्यंमंगलेनयेनात्मामेप्रसीदति ॥३५॥ अन्यथाम्रियमाणस्यनाशुचेर्वृषलीपतेः ॥ वैकुंठना
मग्रहणंजिह्वावक्तुमिहार्हति ॥३६॥ क्वचाहंकितवःपापोब्रह्मघ्नोनिरपत्रपः ॥ क्वचनारायणेत्येत
द्भगवन्नाममंगलं ॥३७॥ सोहंतथायतिष्यामियतचित्तेंद्रियानिलः ॥ यथानभूयआत्मानमंधेत
मसिमज्जये ॥३८॥ विमुच्येतमिमंवंधमविद्याकामकर्मजं ॥ सर्वभूतसुहृच्छांतोमैत्रःकरुणआत्मवान् ॥३९॥

न्जन्मनिदुर्भगः पापीयान् ॥ अथापिजन्मांतरेन्नंपुण्यवानित्याह ॥ विबुधदर्शनरतिनिमित्तेसप्तमी
तेषांदर्शनार्थंपूर्वेणमंगलेनमहतापुण्येनभवितव्यं येनदर्शनेनेन अन्यथापूर्वपुण्यविनाकथंभूतवे

तं विप्रं अमूमुचन् मोचयामासुः ॥१९॥ प्रत्युदिता निराकृताः संतः ॥ याम्या गत्वा यमराजाय यथावत् कथयामासुः ॥
२०॥ दर्शनेनोत्सवो यस्य ॥२१॥ विवक्षुं वक्तुमिच्छुं तं ज्ञात्वा ॥२२॥ त्रैविद्यं वेदत्रयप्रतिपाद्यं ॥ गुणाश्रयं यमदूतानां भागवतं भ
॥ श्रीशुक उवाच ॥ त एवं सुविनिर्णीय धर्मं भागवतं नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥
१९॥ इति प्रत्युदिता याम्या दूता यात्वा यमांतिकम् ॥ यमराज्ञे यथा सर्वमाचचक्षुररिंदम ॥२०॥ द्विजः पाशा
द्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववंदे शिरसा विष्णोः किंकरान् दर्शनोत्सवः ॥२१॥ तं विवक्षुमभिप्रेत्य महा
पुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेनघ ॥२२॥ अजामिलोप्यथाकर्ण्य दूतानां यमकृष्णयोः ॥
धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं ॥२३॥ भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो
महानासीत्स्मरतोऽशुभमात्मनः ॥२४॥ अहो मे परमं कष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्र
ह्म वृषल्यां जायतात्मना ॥२५॥ धिग्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलं ॥ हित्वा बालां सतीं यो हं सुरा
पामसतीमगां ॥२६॥
गवत्प्रणीतम् शुद्धं ॥ निर्गुणं धर्ममाकरे पि इति योज्यम् ॥ भक्तिमान् आ
सीदित्युत्तरस्यानुषंगः ॥२३॥ अनुतापं प्रपंचयति ॥ अहो इति चतुर्भिः ॥ येन आत्मना मया वृषल्यां पुत्रतया
जायमानेन ब्रह्म ब्राह्मण्यं जाति विप्लावितं नाशितं ॥२५॥ दुःकृतं दोषकर्तारं ॥ कुलस्य कज्जलं कलंकं ॥२६॥ ॥ग

बुद्धिः॥ अमिथ्याभूतेर्थे धीर्यस्य तथाभूतः सन् देहादौ ममाहमिति मतिं हित्वा धास्ये॥३७॥ मुक्तः सर्वमनुबंधनं पुत्रादि
स्नेहो येन सः॥३८॥ प्रत्याहृतं इंद्रियग्रामो येन सः॥३९॥ गुणेभ्यो देहेंद्रियादिभ्यः॥ आत्मानं वियुज्य विशोध्य॥ आत्मस

मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः॥३६॥ ममाहमिति
देहादौ हित्वामिथ्यार्थधीर्मतिं॥ धास्ये मनो भगवति शुद्धं तत्कीर्त्तनादिभिः॥३७॥ इति जातसुनिर्वेदः क्षण
संगेन साधुषु॥ गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः॥३८॥ श्री शुक उवाच॥ स तस्मिन्देवसदन आ
सीनो योगमाश्रितः॥ प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि॥३९॥ ततो गुणेभ्य आत्मानं वियुज्यात्म
समाधिना॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि॥४०॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पु
रः॥ उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः॥४१॥ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु॥ स
द्यः स्वरूपं जगृहे भगवत्पार्श्ववर्त्तिनां॥४२॥ साकं विहायसा विप्रो महापुरुषकिंकरैः॥ हैमं विमान
मारुह्य ययौ यत्र श्रियः पतिः॥४३॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा॥ निपात्यमा
नो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन्॥४४॥

माधिना चित्तैकाग्र्येण भगवतो धाम्नि स्वरूपे॥४०॥ तस्मिन्भगवद्धाम्नि उपरता निश्चला धीर्यस्य सः॥ तस्मिन्काले अद्राक्षी
दितिवा॥ पुरः॥ पुरस्तात्॥ ततस्ताः प्रागुपलब्धान् एव तान् उपलभ्य प्रत्यभिज्ञाय ववंदे॥४१॥४२॥४३॥ उपसंहरति एवमिति द्वा

भ्यां॥ विप्लाविताः नाशिताः सर्वे धर्मा येन॥ हतं व्रतं स्व
दारनियमादि यस्य॥४४॥

४५ स्य पापमूलस्य कृंतनं छेदकम् अतः परं नास्ति कस्मात् तीर्थपदस्यानुकीर्तनात् ॥ ततोनुकीर्तनादन्य

भा०ष० कर्मनिबंधस्य पापमूलस्य कलिलमलिनमेव तिष्ठति यत्तु तन्न मनः ॥ ४६ ॥ अमवेद्वितीभवति ॥ ४७ ॥ म्रियमाण

११ ध्याप्रायश्चित्तानंतरं ॥ रजस्तमोभ्यां कलिलं मलिनमेव तिष्ठति यत्तेयमेनापि वेससवीत्कर्षव एनैः ॥ सांतयित्वास्य

श्रवणशालेन श्रद्धाविहीनोपि ॥ ॥ ६ ॥ इति षष्ठे द्वितीयः ॥ २ ॥ ततीयेतु यमेनापि

नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात् ॥ न यत्पुनः कर्मसु सज्जते मनो रज

स्तमोभ्यां कलिलं ततोन्यथा ॥ ४६ ॥ य एवं परमं गुह्यमितिहासमघापहं ॥ शृणुयाच्छ्रद्धया युक्तो य

श्च भक्त्यानुकीर्तयेत् ॥ ४७ ॥ न वै स नरकं याति नेक्षितो यमकिंकरैः ॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके म

हीयते ॥ ४८ ॥ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं ॥ अजामिलोप्यगाद्धाम किंपुनः श्रद्धया गृण

न् ॥ ४९ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे द्वितीयोध्यायः ॥ २ ॥ राजोवाच ॥ निशम्य देवः स्वभटोपवर्णि

तं प्रत्याह किं तानपि धर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोयं ॥ १ ॥

दूतास्ते वै स्वैः किंकरीकृताः ॥ विष्णुदूतैर्विनिर्णीतं शास्त्रार्थं यममुखेन द्रढयितुं तृतीयाध्यारंभः ॥ तत्र यदुक्तं

यमराजेन यथा सर्वमाचष्टेति ॥ ततः किं तत्रवृत्तमिति पृच्छति ॥ निशम्येति मुरारेर्नैदेशिकैः किंकरैः ॥ ए

वं विहितान् ॥ अतस्स्वहताज्ञाय यस्य वशवर्ती अयं जनः ॥ १ ॥ ॥ ऽऽ ॥ ॥ ॥ ॥ ॥ ऽऽ ॥ ॥

सोऽपि तान् प्रति किमाह । अत्याश्चर्यमेतदित्याह । यमस्येति । हे ऋषे यमस्य दंडभंगः कुतश्च नः कस्माच्चिदपि
श्रुतपूर्वो नासीत् । एतद्देवस्मिन् ऋषे यद्वान श्रुतः पूर्वं । एतत्तयमदूत निराकरणं चासीत् । अतः सर्वस्यापि लोकस्य
संशयो वर्त्तते त्वत्तोऽन्यो न छिन्नत्तीति मन्निश्चितं । अतः कथयेति शेषः ॥ २ ॥ भगवतः पुरुषैः प्रतिहत उद्यमो यैषां
तेयाम्याः ॥ ३ ॥ कतिसंतीत्यास्तेपोक्तिः त्रैविध्यः सार्थेष्य ज् ॥ यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः तदर्थे कर्म

यमस्य देवस्य देवस्य न दंडभंगः कुतश्च न ऋषे श्रुतपूर्वे आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं न हि त्व
दन्य इति मे विनिश्चितं ॥ २ ॥ श्रीशुक उवाच ॥ भगवत्पुरुषै राजन् याम्याः प्रतिहतोद्यमाः ॥ पतिं विज्ञाप
यामासुर्यमं संयमनीपतिं ॥ ३ ॥ यमदूता ऊचुः ॥ कति संतीह शास्तारो जीवलोकस्य वै प्रभो ॥ त्रैविध्यं कुर्व
तः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥ यदि स्युर्बहवो लोके शास्तारो दंडधारिणः ॥ कस्य स्यातां न वा कस्य मृत्युश्चा
मृत्तमेव वा ॥ ५ ॥

च फलस्याभिव्यक्तिहेतवः कतिसंतीति ॥ ४ ॥ संतु च बहवः को वापराधस्तत्राह । यदीति । मृत्युर्दुःखं । अमृत्तं मोक्ष
सुखं तेषां विप्रतिपत्तौ तेऽभे कस्य स्यातां ॥ न कस्यापि परस्परविरोधेनोभयोरपि प्रतिवंधात् ॥ एकमत्ये तु कस्य
वा न स्यातां ॥ एकः सुखं कर्त्तुमिच्छति । दुःखं वान्यः ॥ एकमत्ये चैतयोः परस्परकार्यानुमोदनेनोभयोरपि प्राप्तेः
कस्य वा नेऽभे अपि न स्यातामित्यर्थः ॥ ५ ॥ ऽऽ ॥ ऽऽ ॥

ननु बहूनां कर्मिणां व्यवस्थया बहुत्वं॥ शास्तारो भवंतु तथा सति नायं दोषः स्यात् तत्राह॥ बहूनां कर्मिणां व्यवस्थया
शास्तृबहुत्वे शास्तृत्वं स्यात् तद्घटेत॥ किंतु तदा यत्र शास्तरि मुख्यं शास्तृत्वं तत्र कर्तृत्वमपरमेव स्यात्॥ यथा च
चक्रवर्त्तिन एव मुख्यं शास्तृत्वं मंडलवर्त्तिनामुपचारमात्रं निरंकुशत्वाभावात्॥६॥ यस्मादेव शास्तृबहुत्वेन

किंतु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणां॥ शास्तृत्वमुपचारो हि यथा मंडलवर्त्तिनां॥६॥ अतस्त्वमेको
भूतानां सेश्वराणामधीश्वरः॥ शास्ता दंडधरो नॄणां शुभाशुभविवेचनः॥७॥ तस्य ते विहितो दंडो न लोके व
र्त्ततेऽधुना॥ चतुर्भिरद्भुतैः सिद्धै राज्ञा ते विप्रलंभिता॥८॥ नीयमानं तवादेशादस्माभिर्यातनागृहान्॥ व्य
मोचयन्पातकिनं छित्त्वा पाशान्प्रसह्य ते॥९॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं॥ नारायणेत्य
भिहिते माभैरित्याययुर्द्रुतं॥१०॥ श्रीशुक उवाच॥ इति देवः स आपृष्टः प्रजासंयमनो यमः॥ प्रीतः स्वदूता
न्प्रत्याह स्मरन्पादांबुजं हरेः॥११॥ यम उवाच॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं॥ य
दंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः॥१२॥ यत एवमतस्त्वमेकमेव शास्ता शुभाशुभे निर्विनक्ती

तितथा॥७॥ विप्रलंभिता वंचिता लंघितेत्यर्थः॥८॥ तदेवाह॥ नीयमानमिति॥९॥ तेऽत्र तत्र यदि नोऽस्माकं त्वमहितं मन्यसे॥ अन्य
थाज्ञानतस्त्वदवज्ञानेन वाप्यनर्थः स्यात्॥ अतत्केऽभिहिते षां प्रभावः॥ यतो नारायणायेति केवलमभिहिते भामैयं कु
विति वदंतः शीघ्रमागताः॥१०॥ संयमनो नियंता॥११॥ मत्तोऽन्यो जगतस्तस्थुषश्च परोऽधीश्वरोऽस्ति॥ अहं तु जंगमाना

भा० ष० भवत्वेवंभूतोऽन्यः परमेश्वरः॥ ये पुनरस्मान्निर्भर्त्स्य पापिनं रक्षितवंतः॥ ते के इत्याह तस्येति द्वाभ्यां॥ तस्यैव रूपं गुण
१३ प्रभावादयः स्वभावः भक्तवात्सल्यादिर्येषां ते॥१७॥ विष्णोर्भूतानि भृत्याः दुर्दर्शानि द्रष्टुमप्यशक्यानि लिंगानि रू
पाणि येषां तानि॥ भगवद्भक्तिमतः विष्णुभक्तान् परेभ्यः शत्रुभ्यः सर्वतः॥ अस्मादिभ्यश्च रक्षंति॥१८॥ ननु वि

तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महा[illegible]त्मनः॥ प्रायेण दूता इह वै मनोहराश्चरं
ति तद्रूपगुणस्वभावः॥१७॥ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि॥ रक्षंति तद्भक्ति
मर मतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च॥१८॥ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः
न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः॥१९॥ स्वयंभूर्नारदः शंभुः कुमारः कपि मुः ४
लो मनुः॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं॥२०॥ द्वादशैते विजानीमो धर्मं भागवतं भ पत्तिविविति॥२२॥
टाः॥ गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते॥२१॥ एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः॥
भक्तियोगो भगवति तन्नामग्रहणादिभिः॥२२॥

लुभ्मे कोऽपि स्वतंत्रकथमधर्मे धर्मपक्षपातकृतवंतः॥ तत्राह
धर्ममिति॥ ऋषयः॥१९॥ ननु केऽपि चेन्न जानंति॥ तस्य सत्त्वे किं प्रमाणं तत्राह॥ स्वयंभूरिति॥ कुमारः स
नत्कुमारः सनत्कुरः॥ वयमित्यात्मानमेव वक्तृमन्यमानो यमो निर्दिशति॥२०॥ हे भटाः॥२१॥ तमेव धर्ममाह १३

तं प्रोतं च ऊर्द्ध्वतिर्यक्तंतुषु पटवत् यस्य त्वंगेभ्यो विभुस्तेभ्योस्य स्थित्यादयो भवंति यस्य च वसं ल्लोको वर्त्तते ॥ न सिनासिका
यां प्रोतवल्लीवद्वर्त्तते ॥१२॥ एतत्प्रपंचयति ब्राह्मणादिना मभिवीचि निजायां तं त्यां दामन्यां जनानयो वध्नाति दाम भिर्गाः
वलीवर्द्दानिव ॥ इमे जीवा नामकर्म्मभिर्निवद्धैः र्वद्धाः यस्मै वलिं हरंति यदधीनाः कर्म कुर्वंतीत्यर्थः ॥१२॥ यस्य च तंत्री लाढ्
योमामभिवीचिजनान्निजायां वध्नाति तं त्यामिव दामभिर्गाः ॥ यस्मै वलिं त इमे नामकर्मनिवंधवद्धाश्चकिता वहं
ति ॥१३॥ अहं महेंद्रो निर्ऋतिः प्रचेताः सोमोग्निरीशः पवनोर्को विरिंच्यः ॥ आदित्यविश्वे वसवोथ साध्या मरुद्गणा
रुद्रगणाः ससिद्धाः ॥ अन्ये च ये विश्वसृजोमरेशा भृग्वादयोस्पृष्टरजस्तमस्काः ॥ यस्येहितं न विदुः स्पृष्टमा
याः सत्वप्रधाना अपि किं ततोन्ये ॥१४॥ यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ॥ आत्मानमं
तर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्ततः परं ॥१५॥
विभाव्येत्याह अहमिति द्वाभ्यां ॥ नस्पृष्टं रजस्तमश्च येः ई
हितं अभिप्रेतं चेष्टितं वा न विदुः स्पृष्टमायाः मायया स्पृष्टाः ततस्तेभ्योन्ये न विदुः ॥ स्पृष्टमायाः मायया स्पृष्टाः ततः
तेभ्योन्ये न विदुरिति किं पुनर्वक्तव्यं ॥१५॥ तन्मायामोहितत्वान्न जानंतीत्युक्तं ॥ अविषयत्वाच्चेत्याह ॥ यमिति गो
भिरिंद्रियैः हृदा चित्तेन न विचक्षते न पश्यंति ॥ यद्वाचानभ्युदितं ॥ यन्मनसा न मनुत इत्यादिश्रुतेः ॥ आत्मनां जी
वानां ॥ आत्मानं द्रष्टारं ॥ आकृतयो रूपाणि ॥ चक्षुर्यथा कर्मभूतं न जानंति ततः परमाकृतीनां प्रकाशकं न हि प्र
माता प्रमाणस्य विषय इति भावः ॥ एवंभूतः परमेश्वरोस्तीति पूर्वेणैव संवंधः ॥१६॥

यत्तूक्तं यथैतद्धि द्वादशाद्युदिस्मरणमिति तत्राह ॥ प्रायेणेति ॥ महाजनो मन्वादिः अयं भाव ॥ यथा अमृतसंजीवनौ
षधमजानन्तो वैद्या रोगनिर्हरणाय त्रिकटुकनिंबादीन् स्मरंति ॥ तथा स्वयंभू शंभुप्रमुखद्वादशव्यतिरेकेण अन्ये महा
जनोऽगतिगुह्यमिदमज्ञात्वा द्वादशादिकं स्मरंतीति ॥ किंच मायया देव्या अलंमोहितमतिरयं जनः मधुमद्वरं पु पा
भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृताः मतिनिविष्टा मतिर्यस्य ॥ अहो महत्येव

प्रायेण वेद तदिदं न महाजनोयं देव्या विमोहितमतिर्वत मायया ऽलं ॥ त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥ एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भा
न२ वयोगं ॥ ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगा
था ये साधवः समदृशो भगवत्प्रपन्नाः ॥ तन्नः प्रशीदति हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे ॥ २७ ॥

कर्मणि श्रद्धया युज्यमानो ऽल्पे प्रवर्त्तते दृश्यते हि प्राकृतस्य लोकस्य महति मंत्रादौ श्रद्धा अल्पे वा श्रद्धा ॥ तस्माद्दस्य
ग्राहकोनास्तीति तेनैर्न्न ॥ यद्वा ॥ स्वाधीनः सिंहो ऽस्येमावत्ता श्रृगालादिनिवारणाय तं यथा न प्रयुज्यते ॥ तथा तितु छत्वात्पा
पस्य तन्निरसनाय परमं मंगलं हरेर्नाम न स्मरंति ॥ यद्वा ॥ नाममाहात्म्याज्ञाने सर्वमुक्तिप्रसंगादित्येषादिक् ॥ ग्रंथविस्तार
भयान्नेह प्रपंच्यते ॥ २५ ॥ भावयोगं भक्तियोगं अमीषां पातकं न स्यात् ॥ यदि स्यात् उरुगायस्य वादः कीर्त्तनं ॥ २६ ॥ तद्देवध
र्मे तत्त्वनिर्णीय भृत्यान् दूरेणाह ते इति ये भगवंतं प्रपन्नाः ॥ ते देवैः सिद्धैश्च परिगीता पवित्रगाथा ॥ वर्णितपवित्रकथाः ॥ अतः
तान्नोपसीदत तत्समीपमपि न गच्छत ॥ वयः कालोपि न प्रभवति ॥ २७ ॥

दमुच्यत

नचात्रप्रमाणंवक्तव्यमस्तीत्यादित्याह ॥ नामोच्चारणेनेति ॥ येनैव केवलेन सकृदुच्चारितेन ॥ २३ ॥ ननु नामाभासेन कथं स-
र्वपापक्षयः स्यात् ॥ श्रद्धाभक्त्यावृत्त्यादेरपि विधानात् ॥ तथा हि सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यत इति ॥ अ-
नुदिनमिदमादरेण शृण्वन्निति ॥ श्रवणकीर्तनध्यानैर्हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टि-
तमित्याद्यस्मिन्नेव पुराणे तत्र तत्र प्रवृत्ते ॥ पुराणांतरे च पापक्षयो भवति स्मरतां तत महत्त्रिशूमिति ॥ तत्रैव च
तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां ॥ महतामपि कौरव्य विद्ध्यैकांतिकनिःकृतमित्यादिना सम्यक्कीर्तनादे

नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ॥ अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥ २३ ॥ एतावतालम्-
मघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां ॥ विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणे-
ति म्रियमाण इयाय मुक्तिं ॥ २४ ॥

वमन्यत्ते ॥ किंच ॥ तथा सति किमिति मध्वादयो द्वादशाक्षरादीन्स्मरेयुः तस्मादिदं
मनुष्यपन्नमिव तत्राह ॥ एतावतेति ॥ भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यत् ॥ एतावता पुं-
सामघनिर्हरणाय पापक्षयमात्राय अलमुपयोगो नास्ति ॥ अलंशब्दोऽत्र वारणे ॥ तथाह अमरसिंहः ॥ अलं भूषणप-
र्याप्तिशक्तिवारणवाचकमिति ॥ उपयोगाभावमेवाह ॥ अजामिलो महापातक्यपि नारायणेति विक्रुश्य ॥ न तु सम्यक्
कीर्तयित्वा तच्च पुत्रं विक्रुश्य न तु हरिं ॥ अघवानत एव चिरं पिम्रियमाणो न स्वस्थचित्तोऽपि मुक्तिमवाप ॥ न त्वघनिर्हर-
णमात्रं ॥ अतो नामाभासेनापि सर्वपापक्षय इत्येव तत्त्वं ॥ आवृत्तिश्रद्धादिविधयस्तु पापवासनाद्युपायार्थ इत्युक्त-
मेव हरेर्गुणानुवादः खलु सत्त्वभावन इत्यत्र ॥ २४ ॥

भा० ष्क० एतत्दुपपादयति॥ कुस्मांघ्रिपद्मयोर्मधुलेढिश्चास्वादयतितथा॥ मधुलिहा तुच्छत्वेनविसृष्टायेमायागुणाविषयास्तेषुपुन
१५ र्नरमते॥ अन्यस्तुतत्माध्वीस्वादरहितः॥ अतएवकामाभिभूतःसन्नात्मनोरजःपापप्रमाष्टुमपिकर्मैवप्रायश्चित्तरूपमीहते
यतःकर्मणःपुनरपिरजःपापंस्यादेव कुंजरशौचवत् सत्वशोधकत्वाभावात्॥ २३॥ नैवविस्मितधियोवभूवुः॥ किंतुसत्य
मुक्तमित्येवमेनिरे॥ ततःप्रभृतिंप्रतिशंकमानाः॥ अस्मानेवंषहन्यादितिशंकांवहंतस्तद्दृष्टुमपिविभ्यतिस्म॥ पाठांतरेतु

कुस्मांघ्रिपद्ममधुलिण्नपुनर्विसृष्टमायागुणेषुरमतेवृजिनावहेषु॥ अन्यस्तुकामहतआत्मरजः
प्रमाष्टुमीहेतकर्मयतएवरजःपुनःस्यात्॥ २३॥ इत्थंस्वभर्तृगदितंभगवन्महित्वंसंस्मृत्यविस्मितधि
योयमकिंकरास्ते॥ नैवाच्युताश्रयजनंप्रतिशंकमानाद्रष्टुंचविभ्यतिततःप्रभृतिस्मराजन्॥ २४॥ इ
तिहाससिमंमह्यमभ्यवोनुकुंभसंभवः॥ कथयामासमलयआसीनोहरिमर्चयन्॥ २५॥ इतिश्रीमद्भा
गवतेमहापुराणेषष्ठस्कंधेतृतीयोध्यायः॥ ३॥ राजोवाच॥ देवासुरनृणांसर्गोनागानांमृगपक्षिणां॥ सामासि
कस्त्वयाप्रोक्तोयस्तुस्वायंभुवेंतरे॥ १॥
विस्मितधियोजाताः॥ तेचततःप्रभृतिविभ्यतिस्मेत्यर्थः॥ २४॥ इतिषष्ठेतृतीयः॥ ३॥ चतुर्थोदितिभिर्विस्तरेणनिरूप्यते
या॥ प्राचेतसःसुतदक्षस्यवंशस्ताववर्ण्यते॥ चतुर्थहंसप्रलोत्पत्तिर्दक्षेणाराधनंहरेः॥ तपसाहंसगुह्याख्यस्तोत्रेण
चनिरूप्यते॥ प्रसक्तानुप्रसक्तेनस्वायंभुवःसुतान्वये॥ नामप्रभोर्वमाकर्ण्येवंप्राव्योसर्वभुतसेते॥ देवासुरेतितासा
भू० ३॥ २४ कुंभसंभवोऽगस्त्योमलयेपर्वतेआसीनोव्यग्रोहरिमर्चयन्पुत्रःविस्वासार्थहरेःपादोस्पृशन्नित्यर्थः॥ २५॥ १५

केन हि दंडार्थमानेया इत्यत्राह॥ तानिति द्वाभ्यां॥ असतः दुष्टान्॥ तानेवाह॥ मुकुंदपादारविंदयोर्मकरंदरूपो रसस्तस्माद्विमुखान्
कथंभूतात्॥ निष्किंचनैरजस्रं जुष्टात्॥ तेषां ज्ञापकमाह निरयवर्त्मनि स्वधर्मेष्वन्येषु गेहे बद्धतृष्णा यैस्तान्॥२८॥ किंच॥ जिह्वेत्यादि
यद्येषां निकृत्याद्यत्त्वयः॥ न कृतं विष्णुकृत्यं भगवद्भक्तैः॥२९॥ भगवंतं क्षमापयति तदिति॥ अयं भावः॥ नः स्वपुरुषैर्मदीयत्वे

तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं॥ निष्किंचनैः परमहंसकुलैरसंगैर्जुष्टा
द्गृहे निरयवर्त्मनि बद्धतृष्णान्॥२८॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदं॥ कृष्णा
य नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान्॥२९॥ तत्क्षम्यतां स भगवान्पुरुषः पुरा
णो नारायणः स्वपुरुषैर्यदसत्कृतं नः॥ स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने॥३०॥
तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां॥ महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतिं॥३१॥ शृण्वतां गृणतां
वीर्याण्युद्दामानि हरेर्मुहुः॥ यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः॥३२॥

न स्थितैः स्वीयैरेव पुरुषैर्यस्मादसत्॥ अन्याय्यं कृतं॥ तस्मात्त्वयमेव क्षम्यतां॥ सहतां स्वानां स्वीयानां नः॥ न विदु
षां॥ अज्ञानां॥ अहो गरीयसि तस्मिन् क्षांतिर्युक्तैव॥ महद् इति पाठे स्वीयानां माहात्म्यमविदुषां नः क्षमां करोत्वित्यर्थः॥
३०॥ तस्मादित्यादि स्फुटोक्तिः॥ जगतोऽपि मंगलरूपं॥३१॥ एकांतिकत्वमाह शृण्वतामिति॥ व्रतादिभिस्तथा न शुद्ध्येत्॥३२॥

भा० ष०
१६

त्रतंआतिष्ठत आश्रयत सतांमार्गमुपशमयित्रादिभिर्जुष्टं ॥११॥ प्रजानांप्रजापतिरेववंधुः ॥ अतस्तज्जीविकानाशेनक
र्त्तव्यइतिहिष्ठातपंचकेनोहं ॥ लोकानांबालानांमातापितरौ ॥ अज्ञानांज्ञानदोवुधएवसुहृत् ॥१०॥ ईश्वराधिष्ठानत्वा
दुक्तद्रोहेनयुक्तइत्याह ॥ अंतर्देहेषितिवयुष्माभिः ॥१४॥ आकाशादेहेसमुत्पतितं आकस्मिकमित्यर्थः ॥ आत्मविचारेण

आतिष्ठतसतांमार्गंकोपंयच्छतदीपितं ॥ पित्रापितामहेनापिजुष्टंवःप्रपितामहैः ॥११॥ लोकानांपितरंबंधु
दृक्पक्ष्मस्त्रियाःपतिः ॥ पतिःप्रजानांभिक्षूणांगृह्यज्ञानांवुधःसुहृत् ॥१२॥ अंतर्देहेषुभूतानामात्मास्तेहरि
रीश्वरः ॥ सर्वंतद्धिष्ण्यमीक्षध्वमेवंवस्तोषितोह्यसौ ॥१३॥ यःसमुत्पतितंदेहमाकाशान्मन्युमुल्बणं ॥ आ
त्मजिज्ञासयायच्छेत्सगुणानतिवर्त्तते ॥१४॥ अलंदग्धैर्द्रुमैर्दीनैःखिलानांशिवमस्तुवः ॥ वार्क्षीह्येषा
वराकन्यापत्नीत्वेप्रतिगृह्यतां ॥१५॥ इत्यामंत्र्यवरारोहांकन्यामाप्सरसींनृप ॥ सोमोराजाययौदत्त्वातेध
र्मेणोपयेमिरे ॥१६॥ तेभ्यस्तस्यांसमभवद्दक्षःप्राचेतसःकिल ॥ यस्यप्रजाविसर्गेणलोकाआपूरितास्त्र
यः ॥१७॥ यथाससर्जभूतानिदक्षोदुहितृवत्सलः ॥ रेतसामनसाचैवतन्ममावहितःशृणु ॥१८॥

योनियच्छेत ॥१४॥ खिलानांशेषाणां ॥ वःयुष्माकंचशिवमस्तु वृक्षैररक्षणपोषितत्वात्तदीयांकन्यांददाति ॥ वार्क्षीवृक्षैः
पालिता ॥१५॥ आमंत्र्यसांत्वयित्वा आप्सरसीं अप्सरसःप्रम्लोचायाःसुतां ॥१६॥ ॥१७॥ दुहितृवत्सलइतितस्यकन्या
वंशएवेत्युक्तःममत्तः ॥१८॥ १६

व्यासं विस्तारं ॥ ते त्वत्तः यया शक्त्या यथा ससर्ज तां शक्तिं तत्प्रकारं च ज्ञातुमिच्छसि ॥ अनुसर्गमनुवर्ण्यं सर्गं ॥ १ ॥ दक्षादिसृ
ष्ट्यं ससर्जेति वक्तुं दक्षजन्मप्रकारमाह ॥ यदेति प्राचीनबर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गताः तदा गां पृथ्वीं
द्रुमैर्वृतां ददृशुः ॥ नारदोपदेशतः प्राचीनबर्हिषो निवृत्या अराजके सति कृष्याद्यभावात् ॥ ४ ॥ तपसा दीपितो मन्युर्येषां ते

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः ॥ २ ॥ सूत उवाच ॥ इति सं
प्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमः ॥ ३ ॥ श्रीशुक उवाच ॥ यदा प्रचेत
सः पुत्रा दश प्राचीनबर्हिषः ॥ अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां ॥ ४ ॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपित
मन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ॥ राजोवाच म
हान्सोमो मन्युं प्रशमयन्निव ॥ ६ ॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्द्धयिषवो यूयं प्रजानां पत
यः स्मृताः ॥ ७ ॥ अहो प्रजापतिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥
अन्नं चराणामचरा ह्यपदः पादचारिणां ॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ यूयं च पित्रान्वा
दिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥

तेषां द्रुमाणां दग्धुमिच्छया ॥ ५ ॥ ताभ्यां वायुवह्निभ्यां दह्यमानांस्तान्वृक्षान् ॥ वनस्पतीनां राजा सोमः उवाच मा द्रुमे
भ्यः इति नवभिः ॥ हे महाभागा विशेषेण वर्द्धयितुमिच्छवः ॥ ७ ॥ प्रजापतीनां तदन्नस्य भोज्यदाहेऽनुचितमित्याह
अहो इति त्रिभिः ऊर्जं भक्ष्यं इषं अन्नं ॥ ८ ॥ १० ॥

भा०षं० ननुगुणोजडत्वान्नजानाति जीवस्तुचेतनः ॥ किमितिनजानाति अत आह ॥ देहइति ॥ देहश्चासवश्चप्राणा अक्षा
१७ णीन्द्रियाणि मनवश्च अन्तःकरणानि भूतानि चमात्राश्च तन्मात्राणि ॥ आत्मानंस्वस्वरूपंद्रष्टारं ॥ अन्यं इंद्रियवर्गं तयोः
परंदेवतावर्गंचनविदुः ॥ पुमान्जीवस्तुसर्वमेतत्त्रयंवेद ॥ गुणांश्चतन्मूलभूतान्वेद ॥ तज्ज्ञोपिसन्नयंसर्व
ज्ञंनवेदतं अनंतंईडेस्तौमि ॥२५॥ अद्रष्टधामत्वमुक्त्वास्वप्रकाशत्वमाह ॥ यदामनसउपरामः समाधिः ॥ नतुसु

देहोऽसवोऽक्षामनवोभूतमात्रानात्मानमन्यंच विदुःपरंयत् ॥ सर्वंपुमान्वेदगुणांश्चतज्ज्ञोनवेदस
र्वज्ञमनंतमीडे ॥२५॥ यदोपरामोमनसोनामरूपरूपस्यदृष्टस्मृतिसंप्रमोषात् ॥ यईयतेकेवलयास्व
संस्थयाहंसायतस्मैशुचिसद्मनेनमः ॥२६॥ मनीषिणोऽन्तर्हृदिसंनिवेशितंस्वशक्तिभिर्नवभिश्चत्रि
वृद्भिः ॥ वह्निंयथादारुणिपांचदश्यंमनीषयानिष्कर्षंतिगूढम् ॥२७॥ ऽऽ ५ ऽऽ ॥

ननुसुषुप्तौविलयः ॥ नचजाग्रत्स्वप्नयोरिवाविज्ञेयः ॥ तदाह नामरूपेरूप्यतेयेनेतितत्तथातस्योपरमेहे
तुः दृष्टदर्शनंस्मृतिश्चतयोः संप्रमोषान्नाशात् ॥ तदायएकेवलेनस्वरूपज्ञानेनप्रतीयते ॥ तस्मैहंसायशुद्धा
शुचिशुद्धंमनःसद्मप्रतीतिस्थानंयस्यतस्मैनमः ॥२६॥ एवंभूतःकेषांप्रतीयतइत्यपेक्षायामाह ॥ मनीषिण
इतिद्वाभ्यां ॥ विवेकिनोयंनिष्कर्षन्तिविविच्यध्यायन्ति सनिर्वाणसुखानुभूतिर्मेप्रसीदतामितिद्वयोर
न्वयः ॥ एवंनिष्कर्षताप्रतीयतइतिभावः ॥ किमितिनिष्कर्षन्ति ॥ स्वशक्तिभिर्गूढंअप्रकाशमानंकतिभिः ॥ नवभिः पुन

श्चत्रिवृद्भिः ॥ त्रिगुणाभिः ॥ सप्तविंशत्युपाधिभिर्गूढं ॥ अ
ष्टाविंशंनिष्कर्षन्तीत्यर्थः ॥ यद्वा ॥ नवभिःप्रकृतिपुरुषम

१७

प्रजापतिर्दक्षः॥ अवृंहितं असंवद्धं विंध्यस्य पादान्सन्निहितपर्वतान्॥२०॥ २१॥ हंसगुह्याख्येन स्तोत्रेणकस्यद
ह्नस्य॥२२॥ परायसर्वेत्तिमायनमोदधे॥ नमनं करोमि॥ परत्वेहेतुः॥ अवितथा अनुभूतिः चिच्छक्तिर्यस्य॥ अतो
गुणत्रयाभासो जीवो निमित्तं मायाचत्तयोर्वधवे नियंत्रे॥ एवंमपि गुणेषु तत्त्वबुद्धिर्येषां॥ ते जीवे ईदृक्षं धामस्व
रूपं यस्य॥ तत्र हेतुः निरवृत्तमानं यस्मात्॥ पागंतरे निमित्तमानमवधिष्ठ्यं यस्मात् तर्हि किं कथं तस्यासिद्धिरत आ

मन्नसैवस्वज्जनत्र्वर्व प्रजापतिरिमाः प्रजाः॥ देवासुरमनुष्यादीन्नभस्थलजलौकसः॥२३॥ तमवृंहित
मालोक्य प्रजासर्गं प्रजापतिः॥ विंध्यपादानुपव्रज्य सोऽचरदुष्करं तपः॥ तत्राघमर्षणं नाम तीर्थं पापहरं
परं॥ उपस्पृश्यानुसवनं तपसातोषयद्धरिं॥२४॥ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजं॥ तुभ्यं तदभिधा
स्यामि कस्यातुष्यद्यतो हरिः॥२५॥ प्रजापतिरुवाच॥ नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबं
धवे॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे॥२६॥ न यस्य सख्यं पुरुषो वैति सख्युः सखा
वसन्संवसतः पुरेऽस्मिन्॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि॥२७॥

पुरे१ ह॥ स्वयंभुवे स्वप्रकाशाय॥२२॥ अदृष्टधामत्वं दर्शयन्नाह॥ नेति पुरुषः स खा जीवः॥ अस्मिन्देहे वसन्नपि॥ अतएव सं
वसतः सख्युर्यस्य॥ सख्यं करणप्रवर्त्तकत्वादिकं नावेत्ति न जानाति तस्मै कुतः व्यक्तदृष्टेः प्रपंचदृष्टेः नहि द्रष्टा दृश्यो
भवतीति॥ प्रथमांतपाठे व्यक्ते प्रपंच एव दृष्टिर्यस्य सः गुणो विषयो गुणिनः विषयिण इन्द्रियादेः॥ स स्वप्रकाशक -

भागवतटीका स्कं ६ २५

तदेवं वस्तुतो गुणस्वरूपत्वाभावमंगीकृत्य अत्र निरूक्तात्मशक्तिरित्यनेनन्वयेतितं ॥ मायया सर्ववाच्यत्वेन विश्वरूपत्व

माह ॥ यस्मिन्नधिकरणे ॥ यतोऽपादानात् ॥ येन करणेन ॥ यस्य संबंधि ॥ यस्मै संप्रदानाय ॥ यदीप्सिततमं ॥ यः कर्त्ता करो
ति स्वतंत्रः ॥ कार्य्यते चान्येन प्रयोज्यकर्त्री तद्ब्रह्मेति प्रत्येकसंबंधः ॥ अत्र च सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः
यथेति च क्रियाकारकसंबंधप्रकारवाचिनामव्ययानामर्थाः ॥ कुरुते कार्य्यते चेति स्वार्थपरार्थक्रियान्वयस्य
सर्वेषां दर्शितः ॥ चशब्देन भावकर्मादिविहितप्रत्ययार्थाः संगृहीताः ॥ तद्ब्रह्मैवेति कुतस्तत्राह ॥ तद्धेतुस्तेषां का

यस्मिन् यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्य्यते च ॥ परावरेषां परमं प्राक् प्रसिद्धं तद्ब्रह्म
तद्धेतुरनन्यदेकं ॥ ३० ॥ यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति ॥ कुर्वंति चैषां मुहु
रात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने ॥ ३१ ॥

रणं तत्कुतः सर्वेभ्यः प्राक् प्रसिद्धं ॥ ननु ब्रह्मादयस्तद्धेत
वः श्रूयंते ॥ अवरेषु च दृश्यंते तत्कथं ब्रह्मैव तद्धेतुः ॥ तत्राह ॥ परेषामपरेषां च हेतुत्ता नापरमं कारणं ॥ ननु सर्व
कारणत्वे तस्य किं नाम सहकारि भवेत् न तदानीमन्यस्याभावात् ॥ सत्यं निरपेक्षमेव तत्कारणमित्याह ॥ अन
न्यद्विजातीयशून्यं च तस्मै नमस्तु तेरेणान्वयः ॥ ३० ॥ नन्वेवं ब्रह्मैव चेद्विश्वस्य हेतुः तर्हि न कदाचिदनीदृशं जगदि
ति वदंतो मीमांसकाः कुतोऽत्र विवदंते तेन अन्यो स्वभाववादिनः संवदंते ते च तत्त्वविद्भिर्वोधिता अपि कुतः
पुनः पुनर्मुह्यंति तत्राह ॥ यस्य मायाया विद्यायाः शक्तयो विवादस्य केचित्संवादस्य भुवः स्थानानि भवंति त

ई:स्तुति

हृदहंकारपंचतन्मात्ररूपाभिः त्रिवृद्भिस्त्रिगुणात्मिकाभिः ॥ चकारात्तत्षोडशविकाररूपाभिश्च ॥ कथंभूतं तं निष्कर्षं
ति मनीषयांतर्हृदि संनिवेशितं निश्चलीकृतं ॥ पांचदश्यं पंचदशसामिधेनीमंत्रैः प्रकाश्यं यं श्लोके किंवद्वह्निमिवाहंकारा
स्पदादात्मनोऽन्यं परमात्मानं निष्कर्षंतीत्यर्थः ॥२७॥ अशेषविशेषा यस्याः तस्या मायाया निषेधेन निर्वाणसुखेनानु
भूतिर्यस्य ॥ अप्रसक्तनिषेधासंभवात् ॥ प्रसक्तिमाह ॥ स एव सर्वनामा स एव विश्वरूप इति तद्रूपत्वेऽपि वास्तवत्वाभावा
न्निषेधः संभवतीत्याह ॥ अनिरुक्ता आत्मनि शक्तिर्माया यस्य सः ॥२८॥ ननु यदि केवलया [illegible] संस्थया प्रतीयते तर्हि

सर्वेमनाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरु
क्तात्मशक्तिः ॥२८॥ यद्यन्निरुक्तं च वसा निरूपितं धियाक्षभिर्वा मनसोत यस्य ॥ मा भूत्स्वरूपं गुणरूपं हि तं
स वै गुणापायविसर्गलक्षणः ॥२९॥

सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वागाद्यगोचरत्वादित्याशंक्य सर्वैर्नामभिर्वाच्यं प्रत्यक्षादिदृश्यं चेत्तस्य स्व
रूपं वस्तुतो मा भूत् तथापि मायया धरतद्वृत्ति श्लोकत्रयेण प्रपादयन्नमस्करोति ॥ यद्यदिति ॥ यद्वचसा निरुक्तं अभि
हितं धिया निरूपितं व्यवसितं ॥ अक्षभिर्वा इंद्रियैर्निरूपितं गृहीतं ॥ उत अपि मनसापि निरूपितं संकल्पितं ॥ यस्य
स्वप्रकाशत्वं न स्यात् तत्स्वरूपं मा भूत् ॥ स्वरूपत्वाभावे हेतुः ॥ हि यस्मात्तद्गुणानामेव रूपं ॥ पाठांतरे गुणैर्वर्द्धितं स
तु गुणव्यतिरिक्तः ॥ यतो गुणानामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा चेतनाधिष्ठानं विना तयोर
संभवात् ॥ यद्वा यस्य स्वरूपं मा भून्न भवति तस्मै नमः इति तृतीयेनान्वयः ॥२९॥

भा० ष० ननु त्वादृशाः सकामा गणेशादीन्प्रार्थयंते त्वं च तान्विहाय किमिति भगवंतमेव प्रार्थयसे तत्राह ॥ प्राकृतै रर्वाचीनैर्ज्ञा
१९ नपथैरुपासनामार्गैः ॥ यथाशयं तत्तदुपासनानुसारेण यो देहगतोऽन्तर्यामी तत्तद्देवतारूपेण विविधो भाति यथा वा
युः ॥ पार्थिवं पंकादिभेदं गंधमाश्रित्य नानागंधवान्विभाति ॥ रेणुगुणं धूमरत्वादिकमाश्रित्य नानारूपवान्प्रती
यते तद्वत् ॥ तस्यैव तत्तद्देवतारूपेण फलदातृत्वात् ॥ स ईश्वर एव मम मनोरथं सत्यं करोतु ॥ किं नस्तैर्गौणैर्देवतांत

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कु
रुतान्मनोरथः ॥ ३४ ॥ श्रीशुक उवाच ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ॥ प्रादुरासीत्कुरुश्रेष्ठ भग
वान्भक्तवत्सलः ॥ ३५ ॥ कृतपादः सुपर्णांशे प्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः
॥ ३६ ॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ॥ वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥

यो रेरित्यर्थः ॥ तदुक्तं गीतासु ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥ स त
या श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहितान्हि तानिति ॥ ये यथा मां प्रपद्यंते तांस्त
थैव भजाम्यहमिति चेति ॥ ३४ ॥ संस्तुवतो दक्षस्य भगवान्प्रत्यक्षोऽभूत् ॥ ३५ ॥ तमेव वर्णयति सार्धैश्चतुर्भिः ॥ सुपर्ण
स्यांसे स्कंधे कृतौ पादौ येन ॥ प्रलंबा अष्टौ महांतो भुजा यस्य ॥ चक्राद्यष्टायुधधरः ॥ ३६ ॥ प्रसन्ने वदने ईक्षणे च
यस्य ॥ वनमालया विनीतं कंठादिपादांतं तत्तदंगं यस्य ॥ लसंतौ श्रीवत्सकौस्तुभौ यस्य ॥ ३७ ॥

ननु किं तद्ब्रह्म यस्य शास्त्रयोर्विवादादिभवो भवतीति तत्राह । अस्तीति योगः उपासनाशास्त्रं । तत्र हि विराड्रूपे गो
पासनायां तालुपादादिकं अस्तीत्युपास्यत्वेन विधीयते । नास्तीति सांख्यज्ञानशास्त्रं । तत्र ह्यपाणिपादः । अचक्षुःश्रो
त्रमिति च पादादि नास्तीति निषिध्यते । तयोर्योगसांख्ययोर्यत्किंचित्समं । अनुवर्त्तमानं । अवेक्षितं प्रतीतं तद्बृहत् ब्र
ह्म विवादेष्ववादस्य दं ब्रह्मेत्यर्थः । विवादं स्फुटयति भिन्नौ अस्ति नास्तीत्येवं भूतौ विरुद्धौ धर्मौ ययोस्तयोर्भिन्नवि
षयत्वे विरोधो न स्यादित्येकस्थयोरित्युक्तं । एकविषययोः कुतः । वस्तुनिष्ठयोः । पादादि विधिप्रतिषेधयोरेकव

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः । अवेक्षितं किंच न योगशास्त्रयोः स
मं परं ह्यनुकूलं बृहत्तत् । ३२ । योनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः । नामानि रूपाणि
च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु । ३३ ।

स्तुनिष्ठत्वात् समत्वे हेतुः । परं हि । यतो विधिप्रतिषेधयोरविषयस्तयोः पादादिविषयत्वात् । तर्हि तथा अविषय
स्य सद्भावे किं प्रमाणं तत्राह । अनुकूलं अधिष्ठानं विना पादादिकल्पनायोगात् । विधिं विना तन्निषेधायोगाच्च
तयोरुपपादकत्वेन सिद्धमित्यर्थः । तस्मै नम इति शेषः स्यानुषंगः । ननूदासीनस्य समस्य नमस्कारे को लाभ
स्तत्राह । य इति पादमूलं भजतामनुग्रहार्थं प्राकृतरूपनामरहितोपि जन्मभिरवतारैर्विशुद्धान्यूर्जितसत्वानि
रूपाणि कर्मभिर्नामानि च यो भेजे तत्कृतः । भगवानचिंत्यैश्वर्यः स मह्यं प्रसीदतु । ३३ । ॥ १६ ॥ १६

भा० ष० भूतिविस्तारप्रपन्नस्त्वत्तवी चित एवेत्याह ॥ ब्रह्मेति ॥ भवं च तः प्रजापतयः भूतेन ह्नवस्य हेतवः ॥ ४१ ॥ विश्वसृष्ट्यर्थं न त्वन्नप
२० साहं प्रीत इत्युक्तं ॥ तदेव तपःस्तुवन् प्रसंगादन्यान्यपि लोकरक्षकराणि विद्यादीनि स्तौति ॥ तपः यमनियमादिसहितं ध्यानं
मे हृदयं ॥ विद्या सांगमंत्रजपः ॥ स ध्यानं तनोतीति तनुर्देहः ॥ क्रिया ध्यानादिविषयः ॥ पुंव्यापारो भावनाशब्दवाच्यस्तेन हि ध्या
नादि ॥ क्रियत इत्याकृतिः ॥ जातास्तु निष्पन्नाः ॥ क्रतवोऽंगानि शिरो वा एतद्यज्ञस्य वर्ण्यः ॥ ग्रीवाः उपसद इत्यादि श्रुतेः ॥ अन्यभागो वित्या

ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ॥ विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥ ४१ ॥ तपो मे हृदयं ब्रह्मंस्तनुर्वि
द्या क्रियाकृतिः ॥ अंगानि क्रतवो जाता धर्म आत्मासवः सुराः ॥ ४२ ॥ अहमेवासमेवाग्रे नान्यत्किंचांतरं बहिः ॥ सं
ज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४३ ॥ मय्यनंतगुणेऽनंते गुणतो गुणविग्रहः ॥ यदासीत्तत एवाद्यः स्वयं
भूः समभूदजः ॥ ४४ ॥ स वै यदा महादेवो मम वीर्योपबृंहितः ॥ मेने खिलमिवात्मानमुद्यतः सर्गक
र्मणि ॥ ४५ ॥ अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणं ॥ नव विश्वसृजो युष्मान्येनादावसृजद्विभुः ॥ ४६ ॥

विश्रुते ॥ धर्मः क्रत्वाद्यपूर्वं आत्मा मनः ॥ हृदयाश्रयत्वात्सुरा यज्ञभुजस्त एव असवः प्राणाः संतर्पणीयत्वात् ॥ ४२ ॥ तपसः
संतानरक्षाहेतुत्वं दर्शयितुं द्वितीयमुत्पत्तौ योक्तमिति हासमाह चतुर्भिः ॥ अहमेवेति वस्तुतत्त्वान्तरव्यावृत्तिः ॥ आसमेवेति
क्रियांतरव्यावृत्तिः ॥ अंतरया हं च हि ग्राह्यं संज्ञानमात्रं चैतन्यमात्रं ॥ अव्यक्तं ॥ इंद्रियवृत्तिभिरनभिव्यक्तं ॥ अत एव प्रसुप्त
मिव विश्वतः सर्वत्र ॥ ४३ ॥ गुणतो मायातः गुणमयो विग्रहो ब्रह्माण्डं ॥ ततः तेदेवः अजः अयोनिजः ॥ ४४ ॥ खिलमसमर्थमि

२१

२०

महांति किरीटकटकानि यस्य ॥ स्फुरंती मकरकुंडले यस्य ॥ कांच्यादिभिर्विभूषितः ॥ वलयमत्र पादभूषणं द्रष्टव्यं कटकस्यो
क्तत्वात् ॥ ध्ं ॥ त्रैलोक्यमोहनं श्रीपुरुषोत्तमोऽयं ॥ सुरयूथपैर्लोकपालैः ॥ ३५ ॥ ३६ ॥ आपूरितानि मनोद्वाराणि इंद्रियाणि यैः
यथा ह्रदिन्यो नद्यो निर्झरैरापूर्यंते ॥ तथा महानंदपूर्णत्वेनावृत्तिकत्वात् ॥ वागादीनां न किंचित् वक्तुं शक्तोऽभूदित्य

महाकिरीटकटकः स्फुरन्मकरकुंडलः ॥ कांच्यंगुलीयवलयनूपुरांगदभूषितः ॥ ध्ं ॥ त्रैलोक्यमोहनं
रूपं बिभ्रत्त्रिभुवनेश्वरः ॥ वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः ॥ स्तूयमानोऽनुगायद्भिः सिद्धगंधर्वचा
रणैः ॥ ३५ ॥ रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ॥ ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ ३६ ॥ न किंचनो
दीरयितुमशकत्तीव्रया मुदा ॥ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥ ३७ ॥ तं तथावनतं भक्तं प्रजाकामं प्र
जापतिं ॥ चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥ ३८ ॥ श्रीभगवानुवाच ॥ प्राचेतस महाभाग संसिद्धस्तपसा
भवान् ॥ यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥ ३९ ॥ प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः ॥ ममैष कामो भू
तानां यद्भूयासुर्विभूतयः ॥ ४० ॥

पेः ३७ ॥ यद्यप्यसौ नावाच तथापि चित्तज्ञत्वादिदं वक्ष्यमाणमाह ॥ ३८ ॥
भावं भक्तिं गतः प्राप्तः ॥ ३९ ॥ यत् यतस्ते तपः ॥ अस्य विश्वस्य उद्बृंहणं वृद्धिकरं मत ततोऽहं प्रीतः ॥ मत्तपसो लोकस
मृद्ध्यर्थत्वेन च प्रीतिः किंकारणं तत्राह ॥ ममेति भूतानां विभूतयः समृद्धयो भूयासुरिति यत् ॥ एष एव मम कामः ॥ अ

भा० ष० विनिर्धूतो मलो रागादिर्यस्मात्तत्र आसक्तयो येषां तान् शुद्धसत्त्वान् ॥ पित्रादेशेन जाड्येन प्रजाविवृद्धये यत्तानुदृष्ट्वा ४२
२१ नु ददर्श ॥ ४ अहो मोक्षमार्गाधिकारिणः सन्तः एते प्रवृत्तिनिष्ठैः कर्मभिर्नश्येरन्निति कृपया तान्निर्गुणं वाक्यै
रूपदिशति स्म तदाह उवाचेति चतुर्भिः ॥ पालकाः सन्तोपि बालिशाः अज्ञाः यूयं कथं प्रजाः स्रक्ष्यथ ॥ कोतिरेते वाल
कारितपाठे बालिशत्वे हेतुः एक एव पुरुषो यस्मिन् तत् राष्ट्रं दृष्ट्वेत्यनुषंगः ॥ बिलं वेत्यादि द्वितीयान्तानां अविज्ञा

तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोप्युत ॥ तेपिरे तप एवोग्रं पि श्री१
त्रादेशेन यंत्रिताः ॥ प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ॥ ४ उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ
वै प्रजाः ॥ अदृष्ट्वांतं भुवो यूयं बालिशा बत पालकाः ॥ तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं ॥ बहु
रूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं ॥ नदीमुभयतो वाहां पंचपंचाद्भुतं गृहं ॥ क्वचिद्धंसं चित्रकथं क्षौ
रपव्यं स्वयं भ्रमि ॥ कथं स्वपितुरादेशमविद्वांसो विपश्चितः ॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ५
श्रीशुक उवाच ॥ तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया ॥ वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ ६ ॥

य कथं सर्गं करिष्यथेति तृतीयेनान्वयः ॥ पंच पंचानां पंचविंशतेरद्भुतं गृहं ॥ क्षौरपव्यं ॥ क्षुरैः पविभिः वज्रैश्च निर्मि
तमिवातितीक्ष्णं द्वंद्वं चेत्यर्थः ॥ स्वयं स्वतंत्रं भ्रमि भ्रमणं स्वभावं विपश्चितः सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनु
रूपं विद्वांसोऽज्ञात्वा ततः एवौतत्वं चैकपुरुषं राष्ट्रमित्यविज्ञाय अहो कथं सर्गं करिष्यथेत्यन्वयः ॥ ५ वाचः कूटं परो
क्षवादेनार्थान्तरमिव प्रतीयमानं वचनं ॥ औत्पत्तिकी सहजा मनीषा विचारशक्तिर्येषां ते यद्यपि ते स्वयमेव वि
२१

संततिस्तदुपायमाह ॥ एषेति अंग हे दक्ष पंचजनाख्यस्य प्रजापतेः ॥ ५१ ॥ मिथुनस्य यो व्यवायो रतिः स एव धर्मो यस्य सः तं
तथाभूतां यां तस्यां ॥ ५२ ॥ मामयानिमित्तं मत्तया स्त्रियां सह मिथुनीभूय भविष्यंति ॥ पुत्रादिरूपेणोत्पत्स्यंते ॥ ५४ ॥ इति षष्ठ
चतुर्थः ॥ ४ ॥ पंचमे नारदेनाथवा च संकुटैस्तु नाशितान् ॥ सुतानाकर्ण्य दक्षो मुशशापेति निरूप्यते ॥ १ ॥ अपृथग्धर्मशी

एषा पंचजनस्यांग दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ॥ ५२ ॥ मिथुनव्यवायध
र्मस्त्वं प्रजासर्गमिमं पुनः ॥ मिथुनं व्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५३ ॥ त्वत्तोऽधस्तात्प्रजाः सर्वा मि
थुनीभूय मायया ॥ मदीयया भविष्यंति हरिष्यंति च मे बलिं ॥ ५४ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य
भगवान्विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः ॥ ५५ ॥ इति श्रीमद्भागवते महापुराणे ष
ष्ठस्कंधे चतुर्थोध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञा
नयुतं पुत्रानजनयद्विभुः ॥ १ ॥ अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्र :प्रजा २
तीचीं प्रययुर्दिशं ॥ २ ॥ तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः ॥ संगमो यत्र सुमहन्मुनिसिद्धनिषेवितं ॥ ३ ॥

त्वाऽरकाचारस्वभावाः ॥ २ ॥ तत्र प्रतीच्यां दिशि सिंधोर्नद्याः ॥ समुद्रस्य च यत्र संगमस्तत्रस्थं नारा
यणसरो नाम तीर्थं प्रययुरित्यन्वयः ॥ सुमहत् ॥ अतिविस्तीर्णं ॥ ३ ॥ रामरामरामरामरामराम ॥

भा० ष०
२२

नदीमुभयतोवाहामित्यस्यार्थमाह ॥ सृष्ट्यप्ययैककरीत्युभयतःप्रवाहोदर्शितः ॥ वेलाकूलंप्रवाहयतीति ॥ तासां
निर्गमस्थानं ॥ तपोविद्यादितस्यांतेसमीपेवेगिनांनिर्गमप्रतिबंधाय ॥ क्रोधाहंकारादिभिः ॥ कृतवेगंतस्यतद्वेग
नविवशस्य ॥ अतएवतांतथाभूतामविज्ञस्य ॥ अविचारयतः ॥ असद्भिर्मोक्षैः ॥ यद्वा ॥ वेलाकूलंसमुद्रस्यव्यवहारस्थानं
तस्यसमीपेसमुद्रेवृद्धिह्रासाभ्यांयथोभयतोवेहि ॥ कृतवेगानदीभवति ॥ एवंसमुद्रतुल्यस्यात्मनोव्यवहा
रस्थानेदेहेजन्ममरणादिभिःकृतवेगामित्यर्थः ॥ वेगिनीमितिपाठेवेगवती ॥ १२ ॥ पंचपंचेत्यस्यार्थमाह ॥ पंचविं

सृष्ट्यप्ययकरीमायांवेलाकूलांतवेगितां ॥ मत्तस्यतामविज्ञस्यकिमसत्कर्मभिर्भवेत् ॥ १२ ॥ पंचविंश
तितत्वानांपुरुषोद्भुतदर्पणं ॥ अध्यात्ममबुधस्येहकिमसत्कर्मभिर्भवेत् ॥ १३ ॥ ऐश्वरंशास्त्रमुत्सृ
ज्यबंधमोक्षानुदर्शनं ॥ विविक्तपदमज्ञायकिमसत्कर्मभिर्भवेत् ॥ १४ ॥ कालचक्रंभ्रमितीक्ष्णंसर्वं
निष्कर्षयज्जगत् ॥ स्वतंत्रमबुधस्येहकिमसत्कर्मभिर्भवेत् ॥ १५ ॥

शतितत्वानांपुरुषोंऽतर्यामीअद्भुतदर्पणंतं ॥ आत्मस्वरूपआश्रयः ॥ अध्यात्मंकार्यकारणसंघाताधिष्ठातारंतमबु
धस्य ॥ असद्भिःमिथ्यास्वातंत्र्यकर्तृत्वैः ॥ १३ ॥ क्वचिद्धंसमित्यस्यार्थमाह ॥ ऐश्वरंईश्वरप्रतिपादकं ॥ विविक्तंपदंचिज्जड ^
रूपंवस्तुयेनेतिहंसपदव्याख्यानं ॥ बंधमोक्षावनुदर्शयतीति तथाअनेनविचित्राःकथायस्येतिव्याख्यातं ॥ तदत्य
ज्य ॥ अनभ्यस्य ॥ अविज्ञाय ॥ अविदुषः ॥ असद्भिर्बहिर्मुखैः ॥ १४ ॥ क्षौरपव्यमित्यस्यार्थमाह ॥ कालचक्रमिति ॥ भ्रमित्रिभ्र
मणात्मकतीक्ष्णमिति ॥ निःकर्षयदिति क्षौरव्यपदंव्याख्यातं ॥ तदबुधस्य ॥ अतएवफलनिष्पत्त्यत्वबुद्ध्याकाम्यक

[illegible]

नारदोक्तदृष्टवाक्यानां तैर्विमृश्य निर्णीतानर्थानाह दशभिः॥ अदृष्टांतर्भुव इत्यत्र भूशब्दार्थमाह॥ भूरिति क्षेत्रं त
च्चात्र जीवसंज्ञं लिंगशरीरं॥ यत् निजबंधनकारणं॥ अंतःशब्दार्थमाह॥ निर्वाणं नाशं॥ असद्भिर्मोक्षानुपयोगिभिः कर्म
भिः किं भवेन्न किमपि॥७॥ एकपुरुषमित्यस्यार्थमाह॥ एक एवेति॥ तुर्यः सर्वसाक्षी स्वाश्रयः स्वाधारः॥ अभवं नित्यमुक्तं
असद्भिः॥ ईश्वरासमर्पितकर्मभिः॥८॥ विलं वा दृष्टनिर्गमं॥ दृश्यार्थमाह पुमान्यद्गत्वा प्राप्य विलसंगं पातालं गत

द्भूः क्षेत्रं जीवसंज्ञं यदनादिनिजबंधनं॥ अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत्॥७॥ एक एवेश्वरस्तुर्यो
भगवान्स्वाश्रयः परः॥ तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत्॥८॥ पुमान्नैवैति यद्गत्वा विलसंगंगतो यथा॥
प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत्॥९॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता॥ तन्निष्ठामगतस्ये
ह किमसत्कर्मभिर्भवेत्॥१०॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत्॥ तद्गतीरबुधस्येह किमसत्कर्मभि
र्भवेत्॥११॥

नैवैति नावर्तते तत्॥ प्रत्यग्धाम ज्योतिरूपं ब्रह्म॥ अविदः अविदुषः असद्भिः नश्वरस्वर्गादिसाधनैः क-
र्मभिः॥९॥ बहुरूपां स्त्रियमित्यस्यार्थमाह॥ नानारूपेति॥ स्वैरिणी पुंश्चली च विमोहकैः रजआदिगुणैः॥ अन्विता त
न्निष्ठां तस्या अवसानं विवेकं अगतस्य असद्भिरणैतैः॥१०॥ पुमांसं पुंश्चलीपतिमित्यस्या [illegible] अर्थमाह
तस्याः संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य॥ कुत्सिता भार्या यस्य तद्वत्॥ तस्या गतीः सुखलक्षणाः॥ संसरंतं ग
च्छंतं॥ जीवमबुधस्य अज्ञानतः॥ असद्भिः बुद्धिविवेकप्राप्तैः॥११॥ ॥ रामरामराम

बृहस्पतिं वाचां मंत्राणां पतिं विष्णुमाराधयामासुः २५ विशुद्धसत्वाश्रयाय परमहंसाय नमो धीमहि २६ प्रतिसर्गे
धीर्येषां तान् २७ वाचः कूटानि अदृष्ट्वांतं भुव इत्यादीनि प्राह हे दाक्षायणाः संशृणुत तेत्यादि पुनरन्यदपि प्राह

अमद्वाक्यं कतिचिन्मासान् कतिचिद्वायुभोजनाः आराधयन् मंत्रमिममभ्यसंत इडस्पतिं २५ ॐ नमो नारा
यणाय पुरुषाय महात्मने विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि २६ इति तानपि राजेंद्र प्रतिस
र्गधियो मुनिः उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् २७ दाक्षायण्याः संशृणुत गदतो निगमं मम
अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः २८ भ्रातॄणां प्रायणं भ्राता योनुतिष्ठति धर्मवित् सपु
ण्यबंधुः पुरुषो मरुद्भिः सह मोदते २९ एतावदुक्त्वा प्रययौ नारदोमोघदर्शनः तेपि चान्वगमन्
मार्गं भ्रातॄणामेव मारिष २ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः नाद्यापि ते निवर्तंते प
श्चिमा यामिनीरिव २९ एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः पूर्ववन्नारदकृतं पुत्रनाशमुपा
शृणोत् ३०

निगमं मम उपदेशं अन्विच्छत अवलोकयत २६ प्रयाणं प्रकृष्टं गमनं पुण्य एव बंधुर्यस्य महद्भिर्मरुद्भिः
लैः देवैः २७ अमोघं दर्शनं यस्य हे मारिष आर्ष २८ सध्रीचीनं सम्यक् चीनं प्रत्यग्वृत्तिलभ्यं अनुपथं अ
नुगतं पंथानं पश्चिमा यामिनीः रात्रीः रात्रय इव २९ ३०

स्वपितुरादेशमित्यस्यार्थमाह॥ शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः॥ तदनुरूपाय निवर्त्तकमादेशं यो न वेद स कथं गुणवि
भी श्रंभी गुणमयप्रवृत्तिमार्गविश्वासवान् सन्नुपक्रमेत॥ स्वाद्यो प्रवर्त्तेत मोक्षोपेक्षाप्रबुद्धीनां जीवमायांतरात्म
नां॥ शास्त्रकाल्लोपदेशानामज्ञानेकिमुकर्मभिः॥ इति वाचकूटसंग्रहश्लोकः॥ १६॥ इति व्यवसिता एवं निश्चितवंतः
एकचेतसः॥ ऐकमत्ययुक्ताः॥ तं नारदं प्रदक्षिणीकृत्य॥ अपुनरावृत्तिमार्गं प्रययुः॥ १७॥ निर्भातः साक्षात्कृतो यो

शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकं॥ कथं तदनुरूपाय गुणविस्रंभ्युपक्रमेत्॥ १६॥ इति व्यवसिता रा
जन् हर्यश्वा एकचेतसः॥ प्रययुस्तं परिक्रम्य पंथानमनिवर्त्तनं॥ १७॥ स्वरब्रह्मणि निर्भातहृषीकेशपदां
बुजे॥ अखंडं चित्तमावेश्य लोकाननुचरन्मुनिः॥ १८॥ नाशं निशम्य पुत्राणां नारदाच्छीलशालिनां॥ अन्वत
प्यत कः शोचन् सुप्रजास्त्वं शुचां पदं॥ १९॥ स भूयः पांचजन्यायामजेन परिसांत्वितः॥ पुत्रानजनयद्द
क्षः सवलाश्वान्सहस्रशः॥ २०॥ ते पि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः॥ नारायणसरो जग्मुर्यत्र सि
द्धाः स्वपूर्वजाः॥ २१॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः॥ जपंतो ब्रह्म परमं तेपुस्तत्र महत्तपः॥ २२

हृषीकेशः॥ तस्य पदांबुजे॥ अनुचरत्॥ अन्वचरदित्यर्थः॥ १८॥ नाशमदर्शनं स्वधर्मभ्रंशं वा॥ शीलेन शालंते शो
भंते इति तेषां कः॥ दक्षः॥ सुप्रजास्त्वं॥ सत्पुत्रवत्त्वं शुचां शोकानां स्थानं॥ १९॥ अजेन ब्रह्मणा॥ सहस्रशः
सहस्रसंख्यान्॥ २०॥ २१॥ परमं ब्रह्म प्रणवं वक्ष्यमाणमंत्रं वा॥ २२॥ ॥ ६६

वालानांमतिंपुत्रादिविषयांभिनत्तीतितथा॥ एवंनिरनुक्रोशःनिर्घृणःहरेर्यशोनाशकः॥ सन्तत्पार्षदानांम
ध्येकथंचरसि॥२४॥ निर्लज्जोत्वमेवाह॥ ननुत्वामृतेभागवताःसर्वभूतानुग्रहपरवशाः॥ त्वंहुभूतविप्रियंकु
र्वन्कथंनलज्जसेइतिभावः॥२५॥ ननुवैराग्यादुपशमःउपशमात्स्नेहपाशछेदोनभवति॥ नचविरक्तस्यश्रवण
त्रयापाकरणमावश्यकं॥ यदहरेवविरजेत्तदहरेवप्रव्रजेत्॥ यदिचेतरथाब्रह्मचर्यादेवप्रव्रजेदित्यादिश्रुतेः

एवंत्वंनिरनुक्रोशोबालानांमतिभिद्धरेः॥ पार्षदमध्येचरसियशोहानिरपत्रपः॥२४॥ ननुभाग
वतानित्यंभूतानुग्रहकातराः॥ ऋतेत्वांसौहृदघ्नंवैवैरंकारमवैरिणां॥२५॥ नेत्थंपुंसांविरागःस्यात्त्व
याकेवलिनामृषा॥ मन्यसेयद्युपशमंस्नेहपाशनिकृंतनं॥२६॥ नानुभूयनजानातिपुमान्विषय
तीक्ष्णतां॥ निर्विद्यतेस्वयंतस्मान्नतथाभिन्नधीःपरैः॥२७॥ यन्नस्त्वंकर्मसंधानांसाधूनांगृहमेधि
नां॥ कृतवानसिदुर्मर्षंविप्रियंतवमर्षितम्॥२८॥

यत्तोवैराग्योपदेशेनतेषामयाअनुग्रहएवकृतइतिचेत्तत्राह नेति॥ यद्यपित्वमेवमन्यसेतथापिमृषा केवलिना
ज्ञानेनविना॥ अवधूतवेषेणत्वया॥ इत्थंमतिचालनेकृतेऽपिपुंसांविरागोनैवस्यात्॥ नचविरागंविनोपशमः॥ नच
तेनविनास्नेहपाशनिकृंतनमित्यर्थः॥२६॥ कुतस्त्वयाविरागोनस्यादित्यत्रहेतुमाह॥ नानुभूयेत्यत्र ननुभूयविषयाणां
तीक्ष्णतांदुःखहेतुनजानाति॥ तस्माद्विषयानुभवेनतीक्ष्णत्वज्ञानात्॥२७॥ अतस्त्वयाअस्माकमप्रियमेवकृतंतथा
पिवयंनकुर्मइत्याह यदिति॥ कर्मसंघानांकर्मयादानां॥ कर्मसंधीमितिवापाठः॥ विप्रियंकर्मअज्ञानतामित्यर्थः

ना १

पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोऽपि प्रायशो विरक्तः स्यादिति ॥ तदनु सहायार्थं देवर्षिस्तत्पार्श्वं गतः ॥ तदा तमुपलभ्य दक्ष आह ॥३५॥ साधोरिव लिंगं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकाणां ॥ असाधु अकारि कृतं ॥ तदेवाह साधूनां स्वधर्मरक्षणानां भिक्षोर्यो मार्गः स प्रदर्शितः ॥३६॥ ननु संन्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् सत्यं स एव यथापाकरणं विना तु महाननर्थ एवेत्याह ॥ ऋणैरिति ॥ जायमानो वै ब्राह्मणस्त्रिभिः ऋणवान् ॥ जायते ॥ ब्रह्मच

चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ॥ देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥३५॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन नस्त्व ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥३६॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणां ॥ विघातः श्रेयसः पापलोकयोरुभयोः कृतः ॥३७॥

भा

र्येण ऋषिभ्यो यज्ञेन देवेभ्यः ॥ प्रजया पितृभ्यः ॥ एष एव अनृणो यः पुत्री यज्वा ब्रह्मचारीति श्रुतेः ॥ ऋणैरमुक्तानां ॥ अमीमांसितानि ॥ न विचारं तानि कर्माणि यैः ॥ तेषां यावदृणविमोक्षो नास्ति ॥ तदुत्तरकालभावित्वात् ॥ पुत्रोत्पादन ॥ यज्ञानुष्ठानयोरभावेन ॥ पितृदेवर्षि ऋणात् विमुक्तिश्च नास्ति ॥ अतः हे पाप ॥ विषयभोगत्यागात् ॥ इह लोके श्रेयसो विघातः ॥ पूतः ॥ मोक्षानधिकारित्वाच्च ॥ परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः ॥ तथा च मनुः ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध इति ॥३७॥

यतः कीकटाद्भुवो दुर्गाणि दुर्गाभिमानिनो देवाः ॥ यामेयः याम्याः पुत्रः स्वर्गः ॥ दित्तस्तु तः साध्यानां सुतः ॥७॥१०॥
वसोर्वंशस्य मध्ये स्वादंते निर्देशः ॥ मे मत्तः ॥११॥ अभिमतिर्नाम पत्नी तस्या हर्षादयः पुत्राः ॥१२॥ सह आयुश्च पु

ककुभः संकटस्तस्य कीकटस्तनयो यतः ॥ भुवो दुर्गाणि यामेयः सर्गो नंदिस्ततो भवत् ॥६॥ विश्वेदेवा
स्तु विश्वाया अप्रजांस्तान्प्रचक्षते ॥ साध्योगणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥७॥ मरुत्वांश्च जयंतश्च
मरुत्वत्या बभूवतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ॥ मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञि
रे ॥ ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजं ॥९॥ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥१०
वसवोष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ द्रोणः प्राणो ध्रुवोर्कोग्निर्दोषो वस्तुर्विभावसुः ॥११॥ द्रोण
स्याभिमतेः पत्न्या हर्षशोकभयादयः ॥१२॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवं ॥१३॥ ध्रुवस्य
भार्या धरणीरसूत विविधाः पुरः ॥१४॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥१५॥ अग्नेर्भार्या व
सोर्धारा पुत्रा द्रविणकादयः ॥ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥१६॥ दोषस्य शर्वरीपुत्रः शिशु
मारो हरेः कला ॥ वस्तोरांगिरसीपुत्रो विश्वकर्माकृतीपतिः ॥१७॥ ततो मनुश्चाक्षुषोभूद्विश्वे साध्या मनोः सु
ताः ॥१८॥

रोजवश्च पुत्रः ॥१३॥ पुरः पुराणि ॥१४॥१५॥ स्कंदश्च कृत्तिकासुतोग्नेः पुत्रः ॥ शाखादयस्तु इति ॥ आंगिरस्याः प्रसिद्धः ॥ ततः
स्कंदात् ॥१६॥ आकृतिपतिः शिल्पाचार्यः ॥१७॥ ततो विश्वकर्मणः चाक्षुषो मनुरासीत् ॥१८॥ ॥ रामराम रामराम

तथापि तत्र वाभद्रं भविष्यसे तत्राह ॥ तं तु कृंतन संसारछेदक पद्यस्मात् ॥ अभद्रं पुत्राणां स्थानभ्रंशं ॥ पदं स्थानं न भवे
दिति पुत्रछलेन शापः ॥ ३९ ॥ बाढं तद्येति स्वीकृतवान् ॥ ईश्वरोपि प्रति शप्तुं समर्थोपि तितिक्षते न सहते तेति यत् ॥ एता
वानेव ॥ ४० ॥ इति षष्ठ पंचमः ॥ ५ ॥ षष्ठे दक्षस्य सस्रष्टायां कन्याषष्ट्या प्रकीर्तिताः ॥ १ ॥ एवं शप्यत्तो जातो विश्वरूपो दि

तं तु कृंतन यन्नस्त्वमभद्रमचरः पुनः ॥ तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदं ॥ ३९ ॥ श्री शुक उवाच ॥ प्र
तिजग्राह तद्बाढं नारदः साधुसंमतः ॥ एतावान्साधुवादो हि तितिक्षेतेश्वरः स्वयं ॥ ४० ॥ इति श्रीमद्भागव
ते महापुराणे षष्ठस्कंधे पंचमोध्यायः ॥ ५ ॥ श्री शुक उवाच ॥ ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा ॥ ष
ष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥ दश धर्माय कायेंदोर्द्विषट् त्रिनव दत्तवान् ॥ भूतांगिरः कृ
शाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः ॥ २ ॥ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ॥ यासां प्रसूतिप्रसवैर्लोका
आपूरितास्त्रयः ॥ ३ ॥ भानुर्लंबा ककुब्जामिर्विश्वा साध्या मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान्शृ
णु ॥ ४ ॥ भानोस्तु देवऋषभ इंद्रसेनस्ततो नृप ॥ विद्योत आसील्लंबायास्ततश्च स्तनयित्नवः ॥ ५ ॥

तेः सुतान् ॥ १ ॥ नारदात्पुत्राणां नाशमाशंकमानो दुहितृर्जनयामास ॥ १ ॥ कायकश्यपाय द्विषट् द्विगुणाः षट् द्वादश ॥
याः सत्ताः त्रयोदश ॥ शेषस्यर्थः ॥ इंदोः सोमाय त्रिनव सप्तविंशति ॥ तार्क्ष्यनामांतरं प्राप्ताय कश्यपाय अपराः ॥ अत्रैव

भा० ष० तं दक्षं प्रसाद्य केवलं तत्कला एव लेभे न तु पत्न्या निकटं भूताः ॥ क्षये कृष्णपक्षेऽर्दिताः ॥ खंडिताः सत्यः ॥ पाठांतरे क्षयेऽदिता इ
२६ ति ॥ पुनरेधिताः ॥ तेनैव वर्धिताः सतीः ॥२७॥२८॥२९॥ अल्पत्वेन सुगमत्वात् ॥ यथायथं व्युत्क्रमेण तासां वंशानाह

पुनः प्रसाद्य तं सोमः कलाल्लेभे क्षयेऽर्दिताः ॥२७॥ शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ अथ कश्यप
पत्नीनां यत्प्रसूतमिदं जगत् ॥२८॥ अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ताम्रा सु
रभिः सरमा तिमिः ॥२९॥ तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ सुरभेर्महिषा गावो ये चान्ये द्वि
शफा नृप ॥३०॥ ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ दंदशूकादयः सर्पा राजन् क्रोधवशात्म
जाः ॥३१॥ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः ॥
३२॥ सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु ॥ द्विमूर्द्धा शंबरोऽरिष्टो हयग्रीवो विभावसुः ॥३३॥
अयोमुखः शंकुशिराः स्वर्भानुः कपिलोऽरुणः ॥ पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ॥३४॥ धू
म्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ वृषपर्वणस्तु
शर्मिष्ठां ययातिर्नाहुषो बली ॥ वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ॥३५॥ ॥३५॥

तिमेरित्यादिना ॥३०॥३१॥ सौरसाः सुरसायाः पुत्राः ॥ प्राधानिकान् मुख्यान् ॥ अष्टादश प्रमुखान् ॥३२॥३३॥३४॥

२६

ऊषाभार्य्योऽथ यथाऽऽतपात् ॥ पंचयामोऽदिवसो जातः ॥ अतएव रात्रिस्त्रियामा ॥ प्रदोषप्रत्यूषयोर्दिवसावयवत्वात् ॥ १९
भूतस्य द्वे भार्य्ये तयोर्वंशमाह ॥ सरूपेति ॥ २० ॥ महानित्येवमेकादशरूपस्य रुद्रस्य पार्षदाः प्रेतादयः ॥ अन्येऽन्य
स्येऽजाताः ॥ २१ ॥ अंगिरसः स्वधा सती चेति द्वे भार्य्ये ॥ तयोर्वंशमाह ॥ प्रजापतेरिति स्वधा नाम पत्नी पितॄन्पुत्रत्वेऽकरोत्

विभावसोरभूत्तोषा व्युष्टं रोचिष्मान्तपं ॥ पंचयामोऽपन्नत्तानि येन जाग्रति कर्मसु ॥ १९ ॥ सरूपासूत भूतस्य भा
र्य्या रुद्रांश्च कोटिशः ॥ रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥ २० ॥ अजैकपादहिर्बुध्न्यो बहुरूपो महानि
ति ॥ रुद्रस्य पार्षदाश्चान्ये घोराभूतविनायकाः ॥ २१ ॥ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वांगि
रसं वेदं पुत्रत्वे चाकरोत्सती ॥ २२ ॥ कृशाश्वोऽर्चिषि भार्य्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरो दे
वलं वयुनं मनुः ॥ २३ ॥ तार्क्ष्यस्य विनता कद्रूः पतंगी यामिनीति च ॥ पतंग्यसूत पतगान्यामिनी शलभा
नथ ॥ २४ ॥ सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं ॥ सूर्य्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २५ ॥ कृत्तिकादीनि
नक्षत्राणींदोः पत्न्यस्तु भारत ॥ दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ २७ ॥ त २

अथ सती चाथर्वांगिरसं नाम वेदं ॥ २२ ॥ कृशाश्वस्यार्चिर्धिषणेति द्वे भार्य्ये तयोर्वंशमाह ॥ कृशाश्व इति ॥ २३ ॥ २४ ॥
सुपर्णा विनता ॥ अनूरुं अरुणं ॥ २५ ॥ रोहिण्यामेव प्रेमातिशयेनान्यासामपिद्वेषणात् ॥ कुपितस्य दक्षस्य
शापात् ॥ यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् ॥ तास्वनपत्योऽभूत् ॥ २६ ॥

भा० ष० चर्षणयः कृतज्ञानवंतः॥ पश्यंती कर्मत्वेन निर्धार्य वृत्तेः॥ यत्र येषु आत्मानुसंधानविशेषेण मानुषी जातिः ब्रह्मणोपक
२७ ल्पिता॥ तथा च श्रुतिः॥ पुरुषत्वे चाविस्तरामात्मेति॥४४॥ कुपितं हरमिति शेषः॥ विवृतद्विजः प्रकटितदंतः सन्
॥४६॥४७॥ यद्यदा विमतेन अवज्ञातेन॥ बृहस्पतिनापरित्यक्ताः॥ तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरूपं पौ

अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता॥४५॥ पूषानप
त्यः पिष्टादो भग्नदंतोऽभवत्पुरा॥ योऽसौ दक्षाय कुपितं जहास विवृतद्विजः॥४६॥ त्वष्टुर्दैत्यात्मजा भार्या
रचना नाम कन्यका॥ संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान्॥४७॥ तं वव्रिरे सुरगणा स्वस्रीयं द्विषताम
पि॥ विमतेन परित्यक्ता गुरुणांगिरसेन यत्॥४८॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे षष्ठोऽध्यायः॥६॥
राजोवाच॥ यस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः॥ एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ॥१॥
श्रीबादरायणिरुवाच॥ इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः॥ मरुद्भिर्वसुभिः रुद्रैरादित्यैरृभुभिर्नृप॥

रोहित्ये वृतवंतः॥४८॥ इति षष्ठे षष्ठः॥६॥ सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः॥ गुरुणा संपरित्यक्तैः पौरोहित्य
मथाकरोत्॥ यस्य हेतोः कस्माद्धेतोः आत्मनः शिष्याः सुराः परित्यक्ताः॥ अक्रमम् अपराधं॥१॥ स इंद्रो यदा संप्राप्तं
वाचस्पतिं नाभ्यनंदत् नादृतवान् तदा स आंगिरसः ततो निर्गत्य तूष्णीं स्वगृहमाययावित्यष्टानामन्वयः॥
अनादरहेतुमदं दर्शयितुं विशिनष्टि॥ त्रिभुवनैश्वर्यमदेनोल्लंघितः सत्पथो येन सः॥ २७

काल

वैश्वानरोदनोःपुत्रः॥तस्यसुताः॥३६॥कःप्रजापतिः॥कश्यपउपयेमे॥दानवीपरिणयनेहेतुः॥ब्रह्मणाचो
दितइति॥३७॥तयोःषष्टिसहस्राणिनिवातकवचाः॥पुत्राजाताः॥तांश्चस्वर्गंगतःसन्॥तेपितामहोऽर्जुनः

उपदानवीहयशिराःपुलोमाकालकातथा॥उपदानवींहिरण्याक्षःक्रतुर्हयशिरांनृप॥३६॥पुलोमां
कालकांचद्वेवैश्वानरसुतेतुकः॥उपयेमेथभगवान्कश्यपोब्रह्मचोदितः॥३७॥पौलोमाःकालकेयाश्च
दानवायुद्धशालिनः॥तयोःषष्टिसहस्राणियज्ञघ्नांस्तेपितुःपिता॥जघानस्वर्गतोराजन्नेकइंद्रप्रियंक
रः॥३८॥विप्रचित्तिःसिंहिकायांशतंचैकमजीजनत्॥राहुज्येष्ठंकेतुशतंग्रहत्वंयउपागताः॥३९॥
अथातःश्रूयतांवंशोयोदितेरनुपूर्वशः॥यत्रनारायणोदेवःस्वांशेनावतरद्विभुः॥४०॥विवस्वानर्य
मापूषात्वष्टाथसविताभगः॥धाताविधातावरुणोमित्रःशक्रउरुक्रमः॥४१॥विवस्वतःश्राद्धदेवंसं
ज्ञासूयतवैमनुं॥मिथुनंचमहाभागायमंदेवंयमींतथा॥४२॥सैवभूत्वाथवडवानासत्यौसुषुवे
भुवि॥४३॥छायाशनैश्चरंलेभेसावर्णिंचमनुंततः॥कन्यांचतपतींयावैवव्रेसंवरणंपतिं॥४४॥

जघान॥३८॥राहुज्येष्ठोयस्य॥३९॥४०॥४१॥असूयत॥अजनयत्॥४२॥भुविवडवाभूत्वा॥४३॥ततःविव
स्वतः॥४४॥

भा० ष० नन्तु सिंहासनस्थो राजा प्रत्युत्थानं न कुर्यादिति कश्चाव दंति तत्राह य इति द्वाभ्यां ॥ धिषणमासनं ॥ द्वौ कुपथं दिशं
२८ ति उपदिशंतीति कुपथदेष्टारस्तेषां वच ॥ अश्ममयः प्लवो येषां ते ॥ यथाश्मप्लवेन प्लवमनु मज्जंति तद्वत् ॥ ७ ॥ अगाधा

ये पारमेष्ठ्यं धिषणमधितिष्ठन्न किंचन ॥ प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ ६ ॥ तेषां कुपथदेष्टॄ
णां पततां तमसि ह्यधः ॥ ये श्रद्दध्युर्वचस्ते वै मज्जंत्यश्मप्लवा इव ॥ ७ ॥ अथाहममराचार्यमगाधधि
षणं द्विजं ॥ प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥ ८ ॥ एवं चिंतयतस्तस्य मघोनो भगवान्गृहा
त् ॥ बृहस्पतिर्गतो दृश्यां गतिमध्यात्ममायया ॥ ९ ॥ गुरोर्नाधिगतः संज्ञां परीक्षन्भगवान्स्वराट् ॥ ध्याय
न्धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥ १० ॥ तच्छ्रुत्वैवासुराः सर्वे आश्रित्यौशनसं मतं ॥ देवान्प्रत्युद्य
मं चक्रुर्दुर्मदा आततायिनः ॥ ११ ॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ॥ ब्रह्माणं शरणं जग्मु
र्महेन्द्रा नतकंधराः ॥ तांस्तथाभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः ॥ कृपया परया देव उवाच परि
सांत्वयन् ॥ १२ ॥ श्री ब्रह्मोवाच ॥ अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ॥ ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्या
न्नाभ्यनंदत ॥ १३ ॥

गंभीरा धिषणा यस्य तं ॥ निशठः शाठ्यहीनः सन् ॥ ८ ॥ अधिकया आत्ममायया ॥ ९ ॥ गुरोः संज्ञां
चिह्नं उपायं वा दीक्षमाणोऽपि नाधिगतः ॥ अप्राप्तः सन् ॥ १० ॥ आततायिनः उद्यतास्त्राः ॥ ११ ॥ निर्भिन्नानि अंगानि उत्त
मांगानि शिरांसि बाहव ऊरवश्च येषां ॥ १२ ॥ वो युष्माकं कृतं करणं महद[illegible]तद्र ॥ तदाह ब्रह्मिष्ठमिति ॥ नाभ्यनंद

ता ॥ नाधितिततितः ॥ १६ ॥

परिश्रितः॥ परिवृतः॥ आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः॥२ पारमेष्ठ्यैर्महाराजचिह्नैः॥ आसनस्यार्द्धे
स्थितया पौलोम्या सह विराजमानः सन्॥३ प्रत्युत्थानादिना नाभ्यनंदत॥ नोच्चचाल॥ आसने एव स्थितोपि किंचिन्न च

विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः॥ विद्याधराप्सरोभि
श्च किन्नरैः पतगोरगैः॥ निषेव्यमाणो मघवान्स्तूयमानश्च भारत॥ उपगीयमानो ललितमास्थानाध्यासनाश्रि
तः॥ पांडुरेणातपत्रेण चंद्रमंडलचारुणा॥ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः॥ विराजमानः पौलोम्या
सहार्द्धासनया भृशं॥ स यदा परमाचार्यं देवानामात्मनश्च ह॥ नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः
वाचस्पतिं मुनिवरं सुरासुरनमस्कृतं॥ नोच्चचालासनादिंद्रः पश्यन्नपि सभागतं॥ ततो निर्गत्य सहसा कवि
रांगिरसः प्रभुः॥ आययौ स्वगृहं तूष्णीं विद्वान्श्रीमदविक्रियां॥२ तर्ह्येव प्रतिबुध्येंद्रो गुरुहेलनमात्मनः
गर्हयामास सदसि स्वयमात्मानमात्मना॥३ अहो बत मयासाधु कृतं वै दभ्रबुद्धिना॥ यन्मयैश्वर्यमत्तेन गु
रुः सदसि कात्कृतः॥४ को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि॥ ययाहमासुरं भावं नीतोद्य विबुधेश्वरः॥५

लितवान्॥ श्रीमदेन याविक्रिया तां विद्वान्जानन्॥ प्रतिबुध्य अनुस्मृत्य॥ मम कृतं कर्म॥ अहो असाधु॥ यद्य
स्माद्दभ्रबुद्धिना अल्पमतिना मया कात्कृतः तिरस्कृतः॥४ विबुधानां सात्त्विकानां देवानामीश्वरोप्यहं॥५॥

भा०ष० २९ ॥ २८ ॥ अतिथीनां पितॄणां च प्रसंसार्थमाहुः ॥ आचार्य्य उपनीय वेदाध्यापकः ॥ ब्रह्मणो वेदस्य मूर्त्तिः ॥ धर्मस्यात्मा मूर्त्ति
रतिथिः स्वयं साक्षात् ॥ आत्मनः श्रीविष्णोः ॥ यद्वा ॥ आत्मनः स्वस्य सर्वभूतेष्वात्मदृष्टिः कर्त्तव्येत्यर्थः ॥ ३० ॥ परेभ्यः प
राभव एवार्त्तिः तां ॥ ३१ ॥ संदेशमाहुः ॥ वृणीमह इति ॥ ३२ ॥ ननूपाध्यायत्वेन मम कनिष्ठस्य ममाभिवंदनं करिष्यथ त्वे

पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां ॥ अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणां ॥ २८ ॥ आचार्यो
ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्त्तिर्माता साक्षात्क्षितेस्तनुः ॥ २९ ॥ दयाया भ
गिनी मूर्त्तिर्धर्मस्यात्मातिथिः स्वयं ॥ अग्नेरभ्यागतो मूर्त्तिः सर्वभूतानि चात्मनः ॥ तस्मात्पितॄणामा
र्त्तानामार्त्तिं परपराभवम् ॥ तपसापनयंस्तात संदेशं कर्त्तुमर्हसि ॥ ३१ ॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्रा
ब्रा२ ह्मणं गुरुं ॥ यथांजसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवंदनं
॥ छंदोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणं ॥ ३३ ॥ ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महा
तपाः ॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥

गर्हितं तत्राहुः नैति ॥ अर्थेषु प्रयोजनेनिमित्तं यविष्ठानामभिवंदनं न निंदंति ॥ किंच ॥ छंदोभ्यो मंत्रेभ्योऽन्यत्र ब
छ्र२ योज्यैष्ठ्यस्य कारणं न तु मंत्रेषु अतोऽस्माभ्यं मंत्रदातृत्वेन ज्येष्ठो भविष्यसि ॥ यद्वा ॥ छंदोभ्योऽन्यत्र वेदान् वि
हाय ॥ वय एव ज्यैष्ठ्यस्य कारणं न भवति ॥ किंतु वेदा एव कारणं तत्रास्म्येतु वयः वेदज्ञत्वात्त्वमेव ज्येष्ठ इत्य

श्रीराम ॥ राम ॥

२९

परेभ्यः शत्रुभ्यो वः पराभव इतियत् ॥ अयं तस्य अनयस्य अन्यायस्य संबंधोऽफलरूप आसीत् ॥ उक्तं च ॥ ब्राह्मणं कुल
संपन्नं भक्तं विद्यार्महात्मनः ॥ आयंतं वीक्ष्य नोत्तिष्ठेत्स दुःखैः परिभूयते ॥ स्वयमेव वैरिणो हंतारो येषां तेभ्यः ॥ १४
गुरुतिरस्कारसत्कारावेवापचयोपचयकारणमित्युरदृष्टांतेनाह ॥ मघवन्निति द्विषतः शत्रून् काव्यं भार्गवं गु

तस्यायमनयस्यासीत्परेभ्यो वः पराभवः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ॥ १४ ॥ मघवन्द्वि
षतः पश्य प्रक्षीणान्गुर्वतिक्रमात् ॥ संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः ॥ १५ ॥ आददीरन्निल
यनं ममापि भृगुदेवताः ॥ १६ ॥ त्रिविष्टपं किं गणयंत्यमोघमन्त्रा भृगू नामनुशिक्षितार्थाः ॥ न विप्र
गोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्वराणां ॥ १७ ॥ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रम
थात्मवंतं ॥ सभाजितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ १८ ॥ श्रीशुक उवाच ॥ त एव
मुदिता राजन्ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ १९ ॥ देवा ऊचुः ॥ वयं तेति
थयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः संपाद्यतां तात पितॄणां समयोचितः ॥ २० ॥

रुमेव सेव्योपचितान् ॥ १५ ॥ उपचितत्वमेवाह ॥ आददीरन् ॥ गृह्णीयुः ॥ १६ ॥ अभेद्यो मंत्रो येषां ॥ अनुशिक्षिता अर्थाः ॥ शि न २
ष्यायत्तः ॥ विप्रा गोविंदो गावश्च ईश्वराः ॥ अनुग्राहका येषां तेषामेव अभद्राणि भवंति ॥ अन्येषां तु भवंति ॥ १७ ॥ तत्त
स्मात् ॥ अथ अनंतरमेव भजत ॥ अस्य कर्म अस्मदपराधं ॥ १८ ॥ उदिताः उक्ताः ॥ १९ ॥ २० ॥

अस्त्रस्त्वमूः दैत्यसेनाः ॥ ३३ ॥ इति षष्ठे सप्तमः ॥ ७ ॥ अष्टमे विश्वरूपस्तु वर्म नारायणात्मकं । इंद्राय प्राह येनेंद्रो गुप्तो दैत्या
न्ययाजयत् त्रिलोक्याः सर्वधिश्रियं ॥ १ ॥ २ ॥ मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वांगेषु करयोश्च न्यासो
ययागुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ॥ तां प्राह स महेंद्राय विश्वरूप उदारधीः ॥ ३३ ॥ यां प्रविश्यासुरान्
शाम्बत्तक्रघ्रां नारायणात्मिकां ॥ अजैषीद्दर्षभस्तात सिंहः हुद्रमृगानिव ॥ ३४ ॥ इति श्रीमद्भागवते महापु
राणे षष्टस्कंधे सप्तमोऽध्यायः ॥ ७ ॥ राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ॥ क्रीडन्नि
व विनिर्जित्य त्रिलोक्या बुभुजे श्रियं ॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं ॥ यथाततायिनः शत्रून्
येन गुप्तोऽजयन्मृधे ॥ १ ॥ श्रीबादरायणिरुवाच ॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ॥ नारायणा
ख्यं वर्माह तदिहैकमनाः शृणु ॥ २ ॥ विश्वरूप उवाच ॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ॥ कृत
स्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ नारायणपरं वर्म संनह्येद्भय आगते ॥ ३ ॥ पादयोर्जानु
नोरूर्वोरुदरे हृद्यथोरसि ॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ॥ ॐ नमो नारायणायेति विपर्य
येन ॥ नारायणमयं परं वर्म संनह्येत् वध्नीयात् ॥ ३ ॥ तत्राष्टाक्षरेण पादाद्यष्टांगेषु न्यासमाह ॥ पादयोरिति सार्धेन
प्रणवसंपुटितमोंकारादेकैकमक्षरं विन्यसेत् ॥ विपर्ययं च प्राभवत्येवं शिरआदिपादांतं वा विन्यसेत्
उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः ॥ ४ ॥

टी० ६

२१

निंदितमपीदं पुष्पयात्स्वाभगमयेन करिष्यामीत्याह सार्द्धेन॥ विगर्हितं पौरोहित्यं धर्मशीलैः॥ अधर्महेतुत्वा
त्॥ किंच ब्रह्मवर्च्चसउपव्ययं॥ पूर्वसिद्धस्य ब्रह्मवर्च्चसस्य व्ययकरं॥ २७॥ प्रत्याख्यातुं च माद्दृशो नार्हतीत्याह॥ कथंन्वि
ति॥ तेषां शिष्यशिक्षणार्हः॥ स एव प्रत्याख्यानाभाव एव शिष्यस्यार्थ उच्यते॥ २८॥ ननु पौरोहित्येन धनलाभाद्धर्मः

विश्वरूप उवाच॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्च्चउपव्ययं॥ २७॥ कथंनु मद्विधो नाथा लोकेशैरभियाचि
तं॥ प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते॥ २८॥ अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्त्तित
साधुसत्क्रियः॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः॥ २९॥ तथापि न प्रति
ब्रूयां गुरुभिः प्रार्थितं कियत्॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये॥ ३०॥ श्रीबादरायणिरुवाच॥ तेभ्य
एवं प्रतिश्रुत्य विश्वरूपो महातपाः॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना॥ ३१॥ सुरद्विषां श्रियं गुप्ता
मौशनस्यापि विद्यया॥ आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया विभुः॥ ३२॥

सिद्धोत॥ अन्यथा निर्धनस्य कुतो धर्मः॥ अत एव तेन लोको न हृष्यतीति तत्राह॥ अकिंचनानां शिलोंछनं हि धनं द्वेवे
स्वाम्युपेक्षितकणशोपादानं शिलं॥ हट्टादौ पतिततंडुलाद्युपादानं उंछनं॥ इह गृहाश्रमे तेनैव निवर्त्तिता साधु
नां सत्क्रिया येन॥ २९॥ कियदेतत्प्रार्थितं मत्यल्पमेव॥ अभ्यधिकमपि करिष्यामीत्याह॥ भवतामपि॥ ३०॥ समाधि
ना परमोद्यमेन॥ वैष्णवा श्रीनारायणकवचात्मिकया॥ ३२॥ रामराम राम राम॥ रामराम रामराम॥

यादसां गणाः एव वरुणस्य पाशस्तस्मात् ॥१४॥ अटवी आजिमुखं संग्रामो पगरहस्ताद्यैर्येषां तेषु संकटस्थानेषु ॥१५॥
असौ प्रसिद्धो वराहो मामध्वनि रक्षतु ॥ यज्ञैरवयवरूपैः कल्प्यते निरूप्यते इति तथा ॥ उन्नीता उद्धृता धरा येन
सः ॥ अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः ॥१६॥ उग्रधर्मोऽभिचारादिलक्षणस्तस्मात् ॥ हासात् गर्वात् ॥ नरः अ

जलेषु मां रक्षतु मत्स्यमूर्त्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रमः ॥
खेवतु विश्वरूपः ॥१३॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ॥ विमुंचतो यस्य महा
ट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१३॥ रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामो
द्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥१४॥ मामुग्रधर्मादखिलात्प्रमादान्नारायणः
पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात् ॥१५॥ सनत्कुमा
रोऽवतु कामदेवाद्धयशीर्षो मां पथि देवहेलनात् ॥ देवर्षिवर्य्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरया
दशेषात् ॥१६॥ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनां
ताद्बलो गणात्क्रोधवशादहींद्रः ॥१७॥

दत्तो दत्तात्रेयः ॥ अयोगात् योगभ्रंशात् ॥१५॥ पथि यद्देवानां हेलनं ॥ नमस्कारमकृत्वा गमनं तस्मात् पुरुषा
र्चनस्यांतरात् ॥ देवपूजाच्छिद्रात् द्वात्रिंशदपराधरूपात् नारदः ॥ लोकात् जनापवादात् ॥ यज्ञः ॥ जननिमित्तो योंतउ
पघातः ॥ तस्माद्बलभद्रः ॥ अवतात् ॥ कृतांतादिति पाठे कृतांतात् कालात् ॥ द्वंद्वात् ॥ क्रोधवशात् सर्पाणां गणात् अहींद्रः

द्वादशाक्षररूपोंकारः॥ प्रणवादियकारांतमिति॥ प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामत
र्जनीपर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोरग्रांतपर्वसु न्यसेत्॥ मंत्रांतरन्यासमाह॥ न्यसे
दिति॥ षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत्॥ मकारमस्त्रमुद्दिश्य ध्यात्वात॥ न्मकारास्त्रं भ्रत॥

करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया॥ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु॥ ५॥ न्यसेद्धृदयमोंका
ग२ रं विकारमनु मूर्द्धनि॥ षकारांतं भ्रुवोर्मध्ये णकारं शिखया न्यसेत्॥ ६॥ विकारं नेत्रयोर्युंज्यान्नकारं सर्व
संधिषु॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्त्तिर्भवेद्बुधः॥ सविसर्गं फडंतं तत् सर्वदिक्षु विनिर्दिशेत्॥ ७॥ ॐ
नमो विष्णवे नमः॥ इत्यात्मानं परं ध्यायेत्तध्येयं षट्शक्तिभिर्युतं॥ ८॥ विद्यातेजस्तपो मूर्त्तिर्मि
मं मंत्रमुदाहरेत्॥ ९॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे॥ दरारिचर्मा
सिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः॥ ११॥

अस्त्राय फडित्येवं सर्वदिग्बंधे विनिर्दिशेत्॥ ७॥ ध्येयमीश्वररूपमात्मानं ध्यायेत्॥ षट्शक्तिभिः
भगव[illegible]शब्दवाच्याभिः॥ ८॥ विद्या च तेजश्च तपश्च मूर्त्तिर्यस्य॥ तं इमं वक्ष्यमाणं श्रीनारायणकव
चाख्यं॥ १०॥ अष्टगुणः अणिमाद्यष्टैश्वर्ययुक्तः॥ ११॥ रामराम॥ रामराम॥ रामराम॥ रामरामरामराम

भा० ष० अशनिवत्स्पर्शो येषां ते विस्फुलिंगा यस्याः तस्याः संबोधनं ॥ हे गदे त्वमजितस्य प्रियासि ॥ अहं अच्युतस्य दासः
३२ अतः कुष्मांडादीनि निष्पिंढि निष्पिंढि संचूर्णय ॥ अरींश्च चूर्णय सर्वत्र वीप्सा ॥ अतिशीघ्रत्वाय ॥ हे दरेंद्र पांचजन्य
त्वं जातुधानादीन् विद्रावय ॥ विप्रग्रहाः ब्रह्मराक्षसाः येन्ये च घोरदृष्टयस्तान् ॥ २३ ॥ तिग्मा धारा यस्य हे तिग्मधा

निष्पिंढि १ गदेशनिस्पर्शनविस्फुलिंगे निष्पिंढ्यजितप्रियासि ॥ कुष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्ण
य चूर्णयारीन् ॥ २२ ॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्र विद्रावय
कृष्णपूरितो भीमस्वनोरेर्हृदयानि कंपयन् ॥ २३ ॥ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम
छिंधि छिंधि ॥ चर्मंछतचंद्र छादय द्विषामघोनां हर पापचक्षुषां ॥ २४ ॥ यन्नो भयं ग्र
हेभ्यो भूत्केतुभ्यो नृभ्य एव वा ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव च ॥ २५ ॥ सर्वाण्येता
नि भगवन्नामरूपास्त्रकीर्त्तनात् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥ २६ ॥

रा ॥ असिवरः खड्गश्रेष्ठः त्वं ममारिसैन्यं छिंधि छिंधि ॥ शतचंद्राकाराणि मंडलानि यस्मिन् हे शतचंद्र
चर्मन् ॥ अघोनामघवतां द्विषां चक्षूंषि छादय पापचक्षुषां च उग्रदृष्टीनां चक्षूंषि हर ॥ २४ ॥ यत्तु येभ्यो
भयं ॥ अंहोभ्यः पापेभ्यः ॥ २५ ॥ श्रेयःप्रतीपकाः इष्टव्याघातकाः ॥ २६ ॥ ॥

कालमलभ्रंतात्कलेः कल्किः धर्मावनाय धर्मस्त्राणाय ॥ उरुर्महान् कृतो वतारो येन ॥ १९ ॥ दिनस्य षड्भागे
षु क्रमेण मात्तरादिसंज्ञेषु रात्रेश्च प्रदोषादिसंज्ञेषु रक्षा प्रार्थ्यते ॥ मां केशव इति त्रिभिः ॥ आसंगवं संगवमभि
व्याप्य ॥ त्रिधामा ब्रह्मादित्रिमूर्त्तिः ॥ श्रीमाधवः ॥ दोषे प्रदोषे ॥ अर्द्धरात्रे ॥ अर्द्धरात्रिपर्यंते ॥ काले निशीथे च एक एव
पद्मनाभोऽवतु अपररात्रे ईशः श्रीवत्सधामावतु ॥ प्रत्यूष ईशः ॥ श्रीजनार्द्दनः श्रीदामोदरः प्रभाते श्रीविश्वे

द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाषंडगणप्रमादात् ॥ कल्किः कलेः कालमलात्प्रपातु धर्मावना
योरुकृतावतारः ॥ १९ ॥ मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः ॥ नारायणः प्राह्ण उद
त्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥ १९ ॥ देवोपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो
मां ॥ दोषे हृषीकेश उतार्द्धरात्रे निशीथ एकोवतु पद्मनाभः ॥ श्रीवत्सधामापररात्र ईशः प्रत्यूष ई
शोसिधरो जनार्द्दनः ॥ दामोदरोव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्त्तिः ॥ २० ॥ चक्रं युगां
तानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तं ॥ दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुता

श्वरोऽनुसंध्यं प्रतिसंध्यं ॥ २० ॥ युगांतानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य ॥ तच्च चक्रं भगवता प्रयुक्तं सत् ॥ अरिसैन्यं शः ॥ २१ ॥
दंदग्धि अतिशयेन दहति तस्यायं स्वभाव एव न तु तस्मात्प्रार्थनीयमित्यर्थः ॥ यद्वा दंदग्धीति लोण्मध्यमपुरु
षः ॥ तत्र त्वमेवंभूतं च चक्रमिति स्वरूपमुक्त्वा संबुद्ध्या प्रार्थ्यते ॥ अतिशयेन दहेति ॥ कक्षं शुष्कं तृणं ॥ २१ ॥ ॥ ५५

स्तोत्राणि बृहद्रथंतरादिसामानि तैः स्तोभ्यते संस्तूयत इति स्तोत्रस्तोभः छंदोमयो वेदमूर्त्तिः ॥ सुपर्णोसि गरुत्मा
नित्यादिश्रुतेः ॥ एकपद्यपाठे स्तोभागीति पूरकाद्यक्षराणि ॥ स्तोत्रस्तोमेति पाठे समाधारभूतस्त्रिवृत्स्तोमः ॥ २४ ॥ नामा
नि च रूपाणि च यानानि वाहनानि च आयुधानि च मे बुद्ध्यादीन्यां तु ॥ पार्षदभूषणाः पार्षदमुख्याः पांतु ॥ २५ ॥ सच्च त्रस
च्च मूर्त्तामूर्त्तं च यत्तत्सर्वं जगत् ॥ २६ ॥ ऐकात्म्यस्यानुभावोऽनुध्यानं येषां विकल्पो भेदस्तद्रहितोपि ॥ २७ ॥ सत्यमा

गरुडो भगवान् स्तोत्रस्तोभश्छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २७ ॥ सर्वापद्भ्यो
हरेर्नामरूपयानायुधानि नः ॥ बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः ॥ २८ ॥ यथा हि भगवानेव व
स्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ॥ २९ ॥ यथैकात्म्यानुभावानां विकल्परहि
तः स्वयं ॥ भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ॥ पातु
सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३० ॥ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः ॥ प्रहापयं
ल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३१ ॥

नेन सत्यभूतेन प्रमाणेन ॥ ३० ॥ पुनरपि श्रीनृसिंह एव प्रार्थ्यते ॥ विदिक्ष्विति ॥ पात्वित्यनुषंगः ॥ यद्वा नारसिंह
प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेन ग्रस्तानि समस्तानि दिग्गजविषशस्त्रजलवायु
रग्न्यादीनां तेजांसि प्रभावा येन सः ॥ ३१ ॥ राम ॥ ऽऽ ॥ ॥ राम ॥ ऽऽ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

भा० ष०
२३

दंशितः कवचितः ॥ ३२ ॥ सोपि साध्वसाद्भयाद्विमुच्यते ॥ ३३ ॥ तस्य तु भयं न भवेदेव ॥ ३४ ॥ एतद्विद्याप्रभावमिति
हासेन प्राह ॥ इमामिति सार्द्धैस्त्रिभिः ॥ मरुधन्वनि निरुदकदेशे ॥ अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितं ॥ ३५ ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकं ॥ विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥ ३२ ॥ एतद्धार
यमाणस्तु यं यं पश्यति चक्षुषा ॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स प्रमुच्यते ॥ ३३ ॥ न कुतश्चिद्भयं तस्य वि
द्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ ३४ ॥ इमां विद्यां पुरा कश्चित्कौशिको धा
रयन्द्विजः ॥ योगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३५ ॥ तस्योपरि विमानेन गंधर्वपतिरेकदा ॥ ययौ चि
त्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३६ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ ३७ ॥ स वाल
खिल्यवचनादस्थीन्यादाय विस्मितः ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ३८ ॥ श्री शुक उवा
च ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥ ३९ ॥ एतां विद्याम
धिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४० ॥ इति श्रीमद्भागवते मह
पुराणे षष्ठस्कंधे नारायणवर्मोपदेशो नामाष्टमोध्यायः ॥ ८ ॥

यत्र द्विजस्य क्षयो देहत्यागः ॥ तस्योपरि ॥ ३६ ॥ सद्यस्तत्क्षणमेव गगनात् न्यपतत् ॥ पागंतरे श्रंगनाभिःस
ह वालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् ॥ स्वधाम गंधर्वलोकं जगाम ॥ ३८ ॥ ३९ ॥ स्त्र

२३

नवमे विश्वरूपे तु हते शक्रेणाकोपतः ॥ त्वष्ट्रा चोत्पादिते वृत्रे भीतैर्देवैर्हरेः स्तुतिः ॥१॥ सोमस्य पीथं पानं यस्मिन् ॥ एवं
सुरापीथं ॥ अन्नमत्तीत्यन्नादं ॥ अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामित्यादि श्रुतिरनुसंधेया ॥१॥ तस्यासुरपक्ष
पातमाह स वा इति द्वाभ्यां । प्रत्यक्षं सुरपक्षपातमाह स वा इति द्वाभ्यां ॥ प्रत्यक्षं प्रकटं यथा भवति तथा सविनयं

श्रीशुक उवाच ॥ तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति
शुश्रुमः ॥१॥ स वै वर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ॥२॥ स
एव हि ददौ भागं परोक्षमसुरान्प्रति ॥ यजमानोवहद्भागं मातृस्नेहवशानुगः ॥३॥ तद्देवहेलनं तस्य ध
र्मालीकं सुरेश्वरः ॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥४॥ सोमपीथं तु यत्तस्य शिर आसीत्कपि
ञ्जलः ॥ कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः ॥५॥ ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः ॥६॥ संव
त्सरान्ते तदघं भूतानां स विशुद्धये ॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥७॥

टीं गु षं
देवेभ्यो हविर्भागं इन्द्रायेदं अग्नये इदमित्युच्चैरेव ददौ ॥ अत्र हेतुः ॥ यस्य पितरो देवाः सः आसः ॥ असुरेभ्यस्तु
परोक्षं भागं ददौ तद्देवाह ॥ देवान्यजमानोसावसुरान्प्रति भागमवहरत् ॥२॥३॥४॥५॥ तां वारयितुं समर्थः ॥ तथा
पि जग्राह ॥६॥ संवत्सरं तत्रैव स्थित्वा संवत्सरान्ते भूताक्रोशनीतः सन् भूतानां मध्ये विशुद्धये लोकापवादाप
हाराय हरिरिन्द्रो भूम्यादिभ्यस्तदघं विभज्य ददौ ॥७॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ऽऽ

भा० ष० तुरीयं च तुर्थभागं खातस्य गर्त्तस्य पूरणं तेन वरेण यदि खातपूरणं स्वत एव भवति तत्तर्हि गृह्णाम इत्येवं भा
३४ पावं घेन जग्राहेत्यर्थः ॥ पूरणमूषरं ॥ अत एवोषरेऽध्ययनादि निषिध्यते ॥ च ॥ छेदे सति पुनर्विरोहः प्ररोहो भवति इति
वरेण निर्यासरूपेण ब्रह्महत्यायो दृष्टत्वान्निर्यासो न भक्ष्यः ॥ ९ ॥ शश्वत्काम वरेण यावत्प्रसवं गर्भानुपघाते नैव
संभोगवरेण ॥ अत एव रजोदर्शने न तत्संगादि न कार्यं ॥ १० ॥ द्रव्यभूयो वरेण यस्मिन्द्रव्ये क्षीरादावामिश्रा भ

भूतिस्तुरीयं जग्राह खातपूरत्ववरेण वै ॥ इरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ च ॥ तुर्यं छेदविरोहेण व
ऐरा०२ ं जगृहुर्द्रुमाः ॥ तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ ९ ॥ शश्वत्कामवरेणाहुस्तुरीयं जगृहुः स्त्रियः
प३ रजोरूपेण तास्वेहो मासि मासि प्रदृश्यते ॥ १० ॥ द्रव्यभूयो वरेणा[illegible]स्तुरीयं जगृहुर्मतं ॥ तासु बुद्बुदफे
नाभ्यां दृष्टं तद्धरति क्षिपन् ॥ ११ ॥ हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ॥ इन्द्रशत्रो विवर्धस्व मा चिरं
विपुः ॥ तस्य भूयस्त्वमाधिक्यं स्यादिति वरेण ॥ यद्वा ॥ स्वस्यैव निर्मोकेण मादिना भूयस्त्वं ॥ जहि विद्विषम् ॥ १२ ॥
रेण द्रवभूय इति पाठेऽप्ययमेवार्थः ॥ यद्वा द्रव्यभूयस्त्वं सांसिद्धैकद्रवत्वं तेन वरेण ॥ अस्या विभागस्य विश्वरूपे
वैतावद्धूरत्यस्याश्रुतावनुक्तेः ॥ तद्धि भागफलमाहरति निराकरोतीति कः ॥ क्षिपन्बुद्बुदादिमलाद्बहिः प्रक्षिपन्कि
त्यर्थः ॥ यद्वा क्षिपन्[illegible] जले पापं हरतिग[illegible]तीत्यर्थः ॥ अयं च तस्मादापो न परिचक्षतादिति श्रुत्यर्थः ॥ उक्तः ॥ पागंत
रे हरि किल्बिषं इन्द्रपापं ॥ १२ ॥ इन्द्राय इन्द्रं हन्तुं ॥ शत्रवे शक्रत्वन्त्येत्त दाह ॥ इन्द्रशत्रो विवर्धस्वेति ॥ अत्र चेन्द्रशत्रुप

दस्याद्युदात्तत्वात् ॥ बहुव्रीहौ प्रकृत्या पूर्वपदमि
तिस्मृतेः ॥ बहुव्रीहिलक्षणं पत्यायद्रवत्स्य शत्रुरस्मात

ना१

वृत्रमनिर्वीक्ष्य येनावृता इति त्वाष्ट्रोमूर्त्तिर्यस्य तपसस्तेन॥ तथा च श्रुतिः स इमांल्लोकानावृणोत् तद्वृत्रस्य वृत्रत्व
मिति॥१५॥ अग्रसत् अभक्षितवान्॥१६॥ ग्रस्तं तेजो येषां॥ प्रत्यंचं मंतर्यामिणं॥ त्रिभुवनस्य तेन व्याप्तत्वात्॥ क्वापि
गमनासंभवात् तत्रैव स्थित्वा तुष्टुवुरित्यर्थः॥ महाभये परित्राणमन्यतो न भवेदिति हरिमेव प्रपद्यन्ते सुराः श
रणमातुराः॥१७॥ वाय्वादीनि पंचमहाभूतानि तैर्निर्मितास्त्रयो लोकाश्च तेषामधिपतयो ब्रह्मादयश्च ततोऽर्वाची

येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः॥१५॥ तं निजघ्नुरभि
द्रुत्य सगणा विबुधर्षभाः॥ स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः॥१६॥ ततस्ते विस्मिताः सर्वे वि
षण्णा ग्रस्ततेजसः॥ प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः॥१७॥ देवा ऊचुः॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलो
का ब्रह्मादयो ये वयमुद्विजंतः॥ हराम यस्मै बलिमंतकोऽसौ बिभेति यस्मादरणं ततोस्तु नः॥१८॥ अविस्मितं
तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं॥ विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्त्ति सिंधुं॥१९॥

ना वयं सर्वे यस्मै अंतकाय कालायोद्विजंतः संतो बलिं हराम असावपि यस्माद्बिभेति ततः परमेश्वरादेव नोऽस्माकं श
रणमस्तु॥१८॥ तत एवेत्यवधारणे हेतुमाहुः॥ अविस्मितं निरहंकारं कुतः तहलशून्यत्वा॥ कुतः प्रशांतं रागादिशून्यं
तच्च कुतः स्वेनैव लाभेन परिपूर्णकामं॥ तच्च कुतः॥ उपाधिपरिच्छेदशून्य॥ एवंभूतं परमेश्वरं विनाऽपरं यः॥ शर
रण्यमुपसर्पति स हि बालिशोऽज्ञः॥ ततोसौ शुनो लांगूलेन पुच्छेन समुद्रमतितितर्त्ति॥ अतितरितुमिच्छतीत्यर्थः॥ यथा ने

ब्रस्ता २

तदुक्तं श्रुत्वा ॥ यदब्रवीत् स्वाहेंद्रशत्रो वर्द्धस्वेति तस्मादस्येंद्रः शत्रुर्भवदिति ॥ तथा च शिक्षायां मंत्रो हीनः स्वरतो वर्णतो
वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधादिति ॥ १२ ॥ अन्वाहार्यपचनाद्द
क्षिणाग्नेः ॥ १३ ॥ तं वीक्ष्य त्रैलोक्यदर्शा दिशं दुद्रुवुरिति पंचमे नान्वयः ॥ विष्वक्सर्पंततः ईषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानं

घो

अथान्वाहार्यवचनादुत्थितौरदर्शनः ॥ कृतांतः सर्वलोकानां युगांतसमये यथा ॥ १३ ॥ विष्वग्विवर्द्धमानं
तमिषुमात्रं दिने दिने ॥ दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं ॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्क
विलोचनं ॥ देदीप्यमाने त्रिशिखे स्फूल आरोप्य रोदसी ॥ नृत्यंतमुन्नदंतं च चालयंतं पदा महीं ॥ दरीगंभी
रवक्त्रेण पिबन्तं च नभस्तलं ॥ लिहंतं जिह्वया त्रीणि ग्रसंतं भुवनत्रयं ॥ महता रौद्रदंष्ट्रेण जंभमाणं मु
हुर्मुहुः ॥ वित्रस्ता दुद्रुवुर्लोका [illegible] वीक्ष्य सर्वे दिशो दश ॥ १४ ॥

दग्धशैलप्रतिकाशं कज्जलवर्णं संध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तं ॥ तप्ततामवत् शिखाः श्मश्रूणि च यस्य ॥ म
ध्याह्नार्कवद्दुःप्रेक्ष्ये लोचने यस्य रोदसी आरोप्य वेत्त्यर्थः ॥ दरीवत् गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमि
त्यन्वयः ॥ कथं भूतेन नभस्तलं पिबता ॥ स्वस्य त्रीणि द्विजिह्वयालिहता ॥ भुवनत्रयं ग्रसता ॥ महता विस्तीर्णे
रौद्रा दंष्ट्रा यस्मिन् ॥ १४ ॥

भा० ष० ननु प्रधानं पुरुषश्च विश्वस्य कारणं तत्राहुः ॥ प्रधानं पुरुषं च तत्तदात्मको ऽपि स एवेत्यर्थः ॥ स एव नः शं विधास्यति
३६ २३ ॥ प्रतीच्यां दिशि हि दिशि प्रथममाविर्भूतं ॥ पुनश्च तं पुरो दृष्ट्वा ईक्षणेनाह्लादेन विवशा अवनौ दंडवत्पतिताः ॥ संतः प्र
णेमुः श्यायतत्तु तुष्टुवुरित्यन्वयः ॥ २४ ॥ कंठे भूतं श्रीवत्सकौस्तुभौ विना स्वतुल्यैः षोडशभिः सुनंदादिभिः परितः से
वितं ॥ अनिरुद्धशरदंबुरुहवदीक्षणाय स्येत ॥ २५ ॥ यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः वय

~~योनःसपत्नैर्भृशमर्दयमाना~~
तमेव देवं वयमात्मदेवतं परं प्रधानं पुरुषं विश्वमन्यं ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं म
हात्मा ॥ २३ ॥ श्रीशुक उवाच ॥ इति तेषां महाराज सुराणामुपतिष्ठतां ॥ प्रतीच्यां दि[illegible]श्यभूदाविः शंखचक्रगदा
श्रीवत्स २ धरः ॥ २४ ॥ आत्मतुल्यैः षोडशभिर्विना श्रीकौस्तुभं ॥ पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं ॥ दृष्ट्वा तमवनौ सर्व ईक्ष
णाह्लादविक्लवाः ॥ दंडवत्पतिता राजन् शनैरुत्थाय तुष्टुवुः ॥ २५ ॥ देवा ऊचुः ॥ नमस्ते यज्ञ[illegible]वीर्याय वयसे उ
त ते नमः ॥ नमस्ते हस्तचक्राय नमः सुपुरुहूतये ॥ २६ ॥ यत्र गतीनां तिसृणामीशितुः परमं पदं ॥ नार्वाचीनो वि
सर्गस्य धातुर्वेदितुमर्हति ॥ २७ ॥
सेतुः तत्फलपरिछेदकः ॥ कालात्मने पित्ताद्विघातकेषु दैत्येषु ॥ अस्त्रं प्रक्षिप्तं चक्रं येन एवंभूतैः प्रभावैः सुपुरु
हूतये शोभनबहुनाम्ने ॥ २६ ॥ ननु मम गुणातीतं रूपं विहाय गुणैः पाधिकं ॥ यज्ञवीर्येत्यादि किमिति वर्ण्यते
तत्राहुः ॥ यत्र व गुणत्रयस्येशितुर्नियंतुस्त्रिगुणात्मकानां ॥ तिसृणां गतीनां परमं पदं निर्गुणस्वरूपं तव विसर्गस्या

र्वाचीनः इदानींतनः हे धातः वेदितुं नार्हति ॥ अतः केवलं तस्मै तेन नमोऽस्तु ॥ २७ ॥

महाभये स एव रक्षकः इति दृष्टमित्याह यस्येति द्वाभ्यां ॥ यस्य महाशृंगे जगतीं पृथ्वीमेव स्वनावं बध्वा मनुः सत्यव्रतो यथा बहु
जं संकटं ततार स एव वारिचरो मत्स्यमूर्तिर्नोऽस्मानप्याश्रितान् ॥ नूनं त्राता तारयिष्यति ॥ २० ॥ संयमांभसि प्रलयोदके उदीर्णै
रुत्कटैः वातैर्ये ऊर्मयस्तेषां रवैः कराले भयंकरे ॥ अरविंदान्नाभिकमलात्पतितः प्रायः ॥ एकः असहाय एव तस्माद्भयाद्येन
ततार स एव नः पारः तारकोऽस्तु ॥ २१ ॥ किंच न भगवतैव वयं सृष्टाः पालिताश्च बहुशः ॥ अतस्तमेव शरणं व्रजामेत्याहुः ॥ य ए

यस्योरुशृंगे जगतीं स्वनावं मनुर्यथावध्य ततार दुर्गं ॥ स एव नस्त्वाष्ट्रभयाद्दुरंतात्त्राताश्रितान्वारिचरोपि नू
नं ॥ २० ॥ पुरा स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराले ॥ एकोरविंदात्पतितस्ततार तस्माद्भयाद्येन स नो
स्तु पारः ॥ २१ ॥ य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं ॥ वयं न यस्यापि पुरः समीहितः पश्या
म लिंगं पृथगीशमानिनः ॥ २२ ॥ यो नः सपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषु नित्य एव ॥ कृतावतारस्तनुभिः
स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥ ॥

क इति त्रिभिः येनानुगृहीताः संतो विश्वं सृजाम ॥ न तु स्वयमेव स्रष्टारः ॥ नान्योऽस्माकमनुग्राहकोऽस्ति तस्यादर्श
नात्तत्राह ॥ अस्मत्तः पुरः पूर्वमेवांतर्यामितया समीहमानस्यापि यस्य लिंगं रूपं न पश्यामः ॥ अत्र हेतुः पृथक् पृथगी
शा इत्यभिमानिनः ॥ २२ ॥ देवादिषु उपेंद्र परशुराम मत्स्य रामादितनुभिः कृतावतारः सन् आत्मसात्कृत्वा पाति
च ॥ आत्मभूतं दैवतं कुतः विश्वं विश्वात्मकं ॥ तथापि विकारं वारयति ॥ अन्यं विश्वात्मकत्वे हेतुः परं कारणं ॥

भा० ष० दुर्गेत्वं तत्र माहुः ॥ अथ तत्रेति ॥ यथेह देवदत्तो गृहादिनिर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते ॥ एवं भवान्
३७ ब्रह्मस्वरूपो जीवरूपेण गुणविसर्गे संसारे पतितः सन्नुपाददाति यद्वा समंजसं अप्रच्युतं दर्शनं चिच्छक्तिर्यस्य
स भवानुदास्ते उदासीनः साक्षितया वर्तत इति तदेवं विरोधेन दुर्ज्ञेयत्वमुक्तं तत्परिहारेण ज्ञानप्रकारमाहुः ॥ न
हीति ॥ विरुध्यत इति विरोधः उभयं न विरुद्धमित्यर्थः ॥ न ह्यन्यदृष्टांतेन तत्र विविकल्पो युज्यते अतः कैश्चिद्धर्म्यत्वादित्या
हुः ॥ भगवतीति ॥ अपरिमिता गुणगणा यस्य तस्मिन्नीश्वरे स्वतंत्रे अनवगाह्यमतर्क्यं माहात्म्यं यस्य तस्मिन् ॥ विक

अथ तत्र भवान्किं देवदत्तवदिह गुणविसर्गपतितः पारतंत्र्येण स्वकृतकुशलाकुशलं फलमुपाददाति ॥ आहो
स्विदात्माराम उपशमशीलः समंजसदर्शन उदास्त इति ह वाव न विदामः ॥ ३६ न हि विरोध उभयं भगव
त्यपरिगणितगुणगण ईश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कशास्त्रकलिलांतःकरणाश्रय
दुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामंतर्धाय को न्वर्थो दुर्घट इव
भवति स्वरूपद्वयाभावात् ॥ ३७ ॥

त्य एवं वा एवं वदंतीति वितर्कः ॥ किमत्र युक्तमिति विचारः इत्थमेवेति तत्प्रमाणाभासः तदनुग्राहकाः ॥ कुतर्कास्तैरर्वा
चीनाः वस्तुस्वरूपास्पर्शिनो ये विकल्पादयः तेषु शास्त्रेषु तैः ॥ कलिलं व्याकुलं अन्तःकरणमाश्रयो यस्य ॥ दुरवग्रहस्य
तेन वादिनां विवादस्यानवसरे अगोचरे ॥ न तु श्रद्धामात्रमेतत्र युक्तिरुच्यतां तत्राहुः ॥ उपरतो मायामयः संसारो यस्मिन्
केवले आत्ममायामयेनिधाय को न्वर्थः ॥ कर्तृत्वादिनसंभवति यदि वस्तुतः कर्तृत्वादि भवेत्तर्हि विरोधः स्यात् ॥ न तु तदस्ति

मितात्तराणि पद्यानि नमो यंते हरेर्गुणाः ॥ इति पद्यैरस्तुष्यंत तः सद्योगद्येन तुष्टुवुः ॥ भक्त्युद्रेकेण एव बहुधा संबोधयंतो
दुर्ज्ञेयत्वं प्रपंचयंति ॥ भगवन्नित्यादिना परममंगलं सुखबोधमूर्तिर्यस्मिन् ॥ आत्मयोगेनाष्टांगेन यः समाधिः ॥ चित्तैकाग्र्यं
तेन परिभावितः सुशीलितः ॥ परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेन उद्घाटितं तमोरूपं कपाटं यस्मिन् ॥

ॐ नमस्तेस्तु भगवन्नारायण वासुदेवादिपुरुष महानुभाव परममंगल परमकल्याण परमकारु
णिक परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घा
टिततमःकपाटद्वारे चित्तेऽपावृते आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ २० ॥ दुरवबो
ध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन
सगुणमगुणः सृजसि पासि हरसि ॥ २१ ॥

द्वारभूते चित्ते अपावृते प्रकटे आत्मलोके प्रत्यग्रूपे ॥ स्वयमे
वोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान् ॥ २० ॥ ननु केवलानुभवरूपत्वे ममस्रष्ट्रादिक
र्तृत्वं कथं तत्राह ॥ दुरवबोध इव तवायं विहारयोगः ॥ क्रीडोपायः ॥ यतो यस्मात् ॥ अशरणो निराश्रयः ॥ इदं वि
श्वं न अवेक्षितोऽस्माकं ॥ समवायो मेलनं साहाय्यं येन सः ॥ २१ ॥ ॥ ऽऽ ॥

न२ यत्र३

भा० ष० अत एवात्मत्वमेव प्रियः॥ सुहृच्च येषां ते साधवो रागादिशून्याः तत्र हेतुः॥ तव महिमैवामृतरसस्य समुद्रस्तस्य विप्रुषा विं
३८ दुमात्रेण सकृदपि लीढया प्राश्वादितया स्वमनसि निष्यंदमानः॥ अतिशयेन स्रवत् यन्निरंतरं सुखं तेन विस्मारितो दृष्टश्रु
तविषयलेशाभासो येषां ते॥ अत एव भगवति त्वयि नितरां निरंतरं निर्वृत्तं च मनो येषां ते॥ यस्यामनुसेवायां सत्यां॥ ३४

ह्यात्मन् प्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्याव
र्त्तः॥ ३४॥ त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दि श्रि॰३
तिजदनुजादयश्चापि तेषामनुपक्रमसमयोयमिति स्वात्ममायया सुरनरमृगमिश्रितजले
लचराकृतिभिर्यथापराधं दंडं दंडधर दधर्थ एवमेनमपि भगवन् जहि त्वाष्ट्रमुत यदि
मन्यसे॥ ३५॥

प्रस्तुतं विज्ञापयति त्रिभुवनेत्यादिना यावत्समाप्तिः॥ त्रिभुवनमात्मा स्वरूपं भवनं यस्य॥ त्रिभुवनस्यात्मा
भवनं चेति वा॥ त्रयो विक्रमा यस्य त्रीन्लोकान्नयतीति त्रिनयः॥ त्रयाणां लोकानां मनोहरो भावो यस्य॥ एवं च दैत्याः सं
बोध्याः॥ तेषामनुपक्रमसमयः उद्यमकालो न भवतीति मत्वाह हे दंडधर॥ पूर्वं यथा दंडं दधर्थ धृतवा
नसि॥ एवमेनं त्वाष्ट्रमपि जहि॥ यदि मन्यसे हंतुं योग्योसि॥ ३५॥ ३८

अनुग्रहनिग्रहादिकं तु तत्तन्मतिभेदेन त्वन्मायया त्वयि स्फुरतीत्याह ॥ समा विषमा च मतिर्येषां तेषां मतमभिप्रायं सपादि वि
षयाधीर्येषां तेषां रज्जुखण्डस्तथा तथा भाति ॥ यद्वा तमेव विरोधं पुरुषमतिभेदेन दर्शयंति समविषमेति ॥ ३८ ॥ तदेव विरोधं
परिहृत्य निश्चितं परमार्थमाह ॥ स एव हि नानारूपेण प्रतीतः वस्तुस्वरूपः सद्रूपः ॥ सर्वेषां गुणानां विषयाणामाभासैः
प्रकाशैरुपलक्षितः ॥ ननु तेजोवस्त्वोपलक्ष्यते न सर्वं प्रत्यगात्मत्वात् ॥ सर्वांतर्यामित्वात् ॥ जडतादात्म्याध्यासेन जीवस्या

स विसममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियां ॥ ३८ ॥ स एव हि पुनः सर्ववस्तुस्वरूपः स
र्वेश्वरः सकलजगत्कारणकारणभूतः ॥ सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्य्यव
शेषितः ॥ ३९ ॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यंदमानानव
रतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूत
प्रियसुहृदि सर्वात्मनि नितरां निरंतरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ॥

पिजडप्राप्तत्वात्तेन विना प्रकाश इति भावः ॥ पर्य्यवशेषितः ॥ नेति नेतीत्यादिश्रुतिभिः ॥ ३९ ॥ अतस्त्वद्भक्तिरेव परम
पुरुषार्थ इत्याह ॥ अथ हेति पर्य्यावत्तृ इत्यंतेन ॥ यस्मादेवंभूतस्त्वं परमेश्वरः ॥ अथ ह वाव ॥ अत एव हे मधुमथ
न परमभागवता हते त्वत्पदांभोजसेवां कथं मुंचंतु ॥ विसृजंतीत्यन्वयः ॥ हि यस्मात्स्वार्थे पुरुषार्थे कुश

षानुल्लंघ्यास्य व्यवधानेन॥नुभवतः कथं तेषांतपादानतया च॥उपादानस्योपलंभकृतयेति वीस्यंत एव सर्वेषां प्रत्ययानां
बुद्ध्यादीनामपि साक्षिणः॥साक्षित्वे हेतुः॥आकाशवदलिप्तशरीरस्वरूपं यस्य॥अलिप्तत्वे हेतुद्वयं॥साक्षात्परब्रह्मणो नि
रुपाधेः परमात्मनः सुहृत्त्वमत्रैव॥४०॥अतएव सर्वसत्त्वादेव वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः
प्रापिताः॥तदस्मांकं कार्यं स्वयमेवोपकल्प्य संपादयेति॥चरणमेव शतपत्राशं कमलं तस्य छायां विविधैर्वृजि

साक्षिण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः किं यानिह वान्यर्थविशेषो विज्ञापनीयः स्यात्तवि
स्फुलिंगादिभिरिव हिरण्यरेतसः॥४०॥अतएव स्वयं तदुपकल्प्यास्माकं भगवतः परमगुरोस्तव चर
णशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः॥४१॥
अथाईश जहि त्वाष्ट्रं ग्रसंतं भुवनत्रयं॥ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च॥४२॥हंसाय दह्रनिलयाय
निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय॥सत्संग्रहाय भवपांथनिजाश्रमाप्तावंते परीष्टगतये हरये नम
स्ते॥४३॥
नैर्यैः संसारपरिश्रमः तस्योपरामकारी उपसृतानां प्राप्तानां॥४१॥सर्वभक्तेरुत्कर्षीत्वे स्वत्कामसंकामान्नद्विति
स्वकामं कथयंति अथेशाऽनंतरमेव॥४२॥शीघ्रं तद्वधाय पुनः प्रणमंति हंसाय शुद्धाय हृदये आर्तिहराय तेन नमः॥शुद्धत्वे हेतवः
दह्रनिलयाय हृदयाकाशनिकेताय॥निरीक्षकाय बुद्ध्यादिसाक्षिणे कृष्णाय॥सदानंदरूपाय॥कृषिर्भूवाचकः शब्दो न
श्च निर्वृतिवाचकः॥तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति निरुक्तेः॥आर्तिहरत्वे हेतवः॥मृष्टं रुचिरं यशो यस्य॥निरुपक्रमा
य आदिशून्याय सत्संग्रहाय इति तस्मै॥भवपांथः॥भवरूपे पथि वर्तमानः॥तस्य जनस्य निजाश्रमाप्तौ स्वशरणप्राप्तौ सत्यां संसारस्यां
ते परीष्टा सर्वतः प्रतीता उत्तमा गतिः फलं यस्य तस्मै॥४३॥

प्रथमंतावत्त्वदीयानामस्माकंअंतस्तापंशमयितुमर्हसि॥तावकानामित्यत्रहेतुनाहेपितः॥हेपितामहतवचरण
नलिनयुगलध्यानेनैवानुवद्धाहृदयेनिगडःशृंखलायेषांस्वलिंगंविचरणेननिजमूर्त्तिप्रकटनेनस्वीकृतानांकेन॥अ
नुकंपयानुरंजितंसानुरागंचतदस्तुविशदंरुचिरंचशिशिरंचस्मितंतत्सहितेनावलोकेनतथानुकंपयैवविगलि
तमधुरेमुखरसाप्रियवाक्सेवनंतत्कलातयाच॥३२॥किंचास्मदभिप्रायः॥त्वयाज्ञायतएवकिमत्रास्माभिर्विज्ञाप

अस्माकंतावकानामवनतानांतातपितामहतवचरणनलिनयुगलध्यानानुवद्धहृदयनिगडानांस्वलिं
गंविचरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेनविगलितमधुरमुख
नर्घम ३ रसामृतकलयाचांतस्तापमर्हसिशमयितुं॥३२॥अथभगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलय
निमित्तायमानदिव्यमायाविनोदस्यसकलजीवनिकायानामंतर्हृदयेषुवहिरपिचब्रह्मप्रत्यगात्मरू
पेणप्रधानरूपेणचयथादेशकालदेहावस्थानविशेषंतदुपादानोपलंभकतयानुभवतःसर्वप्रत्यय

नीयामित्याहुःअथहेभगवन्तवास्माभिरिहकियान्वार्थविशेषोविज्ञापनीयःस्यादित्यन्वयः॥यथाहिरण्यरेतसो
ऽग्नेस्तदंशभूतैर्विस्फुलिंगादिभिःप्रकाशोनक्रियते॥तथात्वास्माभिःकार्यार्थंप्रकाशनंनकार्यमित्यर्थः॥अत्रहे
तुगर्भाणिविशेषणानि॥अखिलजगतामुत्पत्त्यादिषुनिमित्तंमानयादिव्यमाययाविनोदस्यअतएवसर्वजीवनि
कायानामंतर्हृदयेषुब्रह्मस्वरूपेणप्रत्यगात्मांतर्यामीतद्रूपेणवहिरपिचप्रधानरूपेणदेशकालदेहावस्थानविशे

भा० ष० तत्र तदीयं विद्यातिशयमाह ॥ स वा इति द्वाभ्यां ॥ एवं ह्यत्र प्रसिद्धा कथा ॥ निशम्याथर्वणं दध्यञ्चं प्रवर्ग्यब्रह्मविद्ययोः ॥ दध्यं
८० चं समागम्य तमूचतुरश्विनौ ॥ भगवन्नौ देहि नौ विद्यामिति श्रुत्वा स च प्राब्रवीत् ॥ कर्मण्यवस्थितो ह्यहं पश्चाद्वक्ष्यामि
गच्छतं ॥ तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिं उवाच ॥ भिषजोर्या विद्यामावदीरश्विनोर्मुने ॥ यदि मद्वाक्यमुल्लंघ्य ब्रवी
षि सहसैव ते शिरश्छिंद्यां न संदेहस्तु तत्रा स ययौ हरिः ॥ इंद्रे गते तथाभ्येत्य नासत्यावूचतुर्द्विजं ॥ तन्मुखादिंद्रगदितं
श्रुत्वा तावूचतुः पुनः ॥ आवां तव शिरश्छित्वा पूर्वमश्वस्य मस्तकं ॥ संधास्यावस्ततो ब्रूहि ते न विद्यां च नौ द्विज ॥ तस्मिन्निंद्रेण सं

स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलं ॥ यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥ ५२ ॥ द
ध्यङ्ङाथर्वणस्त्वाष्ट्रे वर्माभेद्यं मदात्मकं ॥ विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५३ ॥ ॥ ऽऽ ॥

छिन्ने पुनः संधाय मस्तकं ॥ निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतं ॥ एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्त
योः ॥ प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतो ऽसत्यशंकित इति ॥ तत्रायमर्थः ॥ दध्यङ् निष्कलं शुद्धं ब्रह्म अधिगतः ज्ञानवान् ॥ पा
गंतरे तु नितरां कृतं भवति धनं तं प्रवर्ग्यं वाधिगतः ज्ञानवान् ततो ऽश्विभ्यां प्रादादित्युत्तरस्यानुषंगः ॥ उपदिदेशेत्यर्थः ॥ कथं
भूतं ब्रह्म ॥ अथैवमश्विशिरसा प्रोक्तत्वादश्वशिरो नाम प्रसिद्धं तयोरमरतां जीवन्मुक्तत्वं व्यवधात् ॥ तथा च श्रुतिः ॥ अश्वस्य शी
र्ष्णा प्र यदीमुवाचेति ॥ ५२ ॥ मदात्मकं वर्म श्रीनारायणकवचं अधिगत इति सर्वस्यानुषंगः ॥ तत्र हेतुः यद्यस्मात्त्वष्ट्रे प्रादात् त
किं ततः ॥ यत् त्वष्टा च विश्वरूपाय पुत्राय प्रादात् ॥ कीदृशं यत्त्वं ततो विश्वरूपात् अधाः धृतवानसि ॥ तदेवं विद्यायाः सारं मात्रे या ८०

अभिनंदितः संतोषितः ॥४४॥ मदीयमुपस्थानं स्तोत्रं तत्सहितया विद्यया ज्ञानेन आत्मन ऐश्वर्यमसंसारित्वं तस्य स्मृतिर्यया
न हि विरोध उभयमित्यादिना कर्त्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः भक्तिश्च यया भवति ॥४५॥ अथ भगवन्नित्यादिना भक्तेः
सर्वोत्कर्षोक्तेर्भक्तमभिनंदति किमिति ॥४६॥ यदुक्तं देवैः स्वयं यदुपकल्पया स्माकमित्यादि तत्संपादनं न कृपालोर्मेमा

श्रीशुक उवाच ॥ अथैवमीडितो राजन्सादरं त्रिदशैर्हरिः ॥ स्वमुपस्थानमाकर्ण्य प्राह तानभिनंदितः ॥४४॥ श्री
भगवानुवाच ॥ प्रीतोहं वः सुरश्रेष्ठा मदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥४५॥
किं दुरापं मयि प्रीते तथापि विबुधर्षभाः ॥ मय्येकांतमतिर्नान्यन्मत्तो वांछति तत्त्ववित् ॥४६॥ न वेद कृपणः
श्रेय आत्मनो गुणवस्तुदृक् ॥ तस्य तानिच्छतो यच्छेद्यदि सोपि तथाविधः ॥४७॥ स्वयं निःश्रेयसं विद्वान्न
वक्त्यज्ञाय कर्म हि ॥ न राति रोगिणोऽपथ्यं वांछितोपि भिषक्तमः ॥४८॥ मघवन्यात भद्रं वो दध्यंचमृ
षिसत्तमं ॥ विद्याव्रततपःसारं गात्रं याचत मा चिरं ॥४९॥

नुचितमित्याशयेनाह ॥ न वेदेति द्वाभ्यां ॥ गुणेषु विष
येषु तत्त्वदर्शी तान्विषयान् ॥ तथाविधोऽज्ञ एव ॥४७॥ कर्म न वक्ति प्रवृत्तिमार्गं न वक्ति हि ॥ अपथ्यं यया न राति न
ददाति ॥ भिषक्तमः सद्वैद्यः ॥४८॥ एवं तत्त्वकथनेनानौचित्यं परिहृत्य तदभिप्रायमेनुस्मरन्नाह ॥ मघवन्नि
ति ॥ विद्याव्रतैः तपसा च सारं दृढं गात्रं शरीरं याचत याचध्वम् ॥४९॥

भा० ष०
४१

आत्मादेहः वयंजानीम एव किंतु श्रीविष्णुरस्मन्मुखेन याचत इति चेत्तत्राह ॥ याचमानायविष्णवे ऽपिदातुंकउत्सहेत
॥४॥ पुण्यश्लोकैरीड्यानि कर्माणियेषां ॥५॥ याचकोयदिवेदतर्हिनयाचेत यदीश्वरः दानसमर्थस्तत्र हिं सोपिनेतिनाह
अतोयथातवसंकटंवयंस्वार्थपरानजानीम एवंप्रत्याचक्षाणस्त्वमस्मत्संकटंनजानासीतिभावः ॥६॥ मेमयाप्रत्युदाहृ

जिजीविषूणांजीवानामात्माप्रेष्ठइहेप्सितः ॥ कउत्सहेततंदातुंभिक्षमाणायविष्णवे ॥४॥ देवाऊचुः ॥
किंनुतद्दुस्त्यजंब्रह्मन्पुंसांभूतानुकंपिनां ॥ भवद्विधानांमहतांपुण्यश्लोकेड्यकर्मणां ॥५॥ नूनंस्वार्थपरो
लोकोनवेदपरसंकटं ॥ यदिवेदनयाचेतनेतिनाहयदीश्वरः ॥६॥ ऋषिरुवाच ॥ धर्मंवःश्रोतुकामेनयूयं
मेप्रत्युदाहृताः ॥ एषवःप्रियमात्मानंत्यजंतंसंत्यजाम्यहं ॥७॥ योध्रुवेणात्मनानाथानधर्मंनयशःपु
मान् ॥ ईहेतभूतदययासशोच्यःस्थावरैरपि ॥८॥ एतावानव्ययोधर्मःपुण्यश्लोकैरुपासितः ॥ योभू
तशोकहर्षाभ्यामात्माशोचतिहृष्यति ॥९॥ अहोदैन्यमहोकष्टंपारक्यैःक्षणभंगुरैः ॥ यन्नोपकुर्यादस्वा
र्थैर्मर्त्यःस्वज्ञातिविग्रहैः ॥१०॥ श्री

ताः प्रत्युक्ताः ॥ मांत्यजंतंत्यक्ष्यामि तं ॥ आत्मानंदेहं ॥७॥ अध्रुवेणात्मना ॥ दे
हेन हेनाथ ॥८॥ भूतानांशोकेनशोचति हर्षेणहृष्यति ॥ यः आत्मा स्वयं तस्य योधर्मः ॥ एतावानेवाव्ययइत्यर्थः ॥९॥
पारक्यैः श्वसृगालादिभक्ष्यैः ॥ अस्वार्थैः ॥ आत्मोपयोगशून्यैः ॥ स्ववित्तं ज्ञातयः पुत्रादयः विग्रहादेहः तैर्नोप

[illegible]

ननु प्रेष्टं देहं कथं दास्यतीति तत्राह ॥ युष्मभ्यं अंगानि अस्थीनि याचितः सन् दास्यति ॥ यतो धर्मज्ञः ॥ विशेषतो अश्विभ्यां शिष्यप्रीत्या दास्यति ॥ अस्थीनीत्यनेन नहेयत्वं दर्शितं तैर् अस्थिभिर् विश्वकर्मणा विनिर्मित आयुधश्रेष्टो वज्रो भविष्यतीति विशेषः ॥ येन मवान् वृत्रशिरो हर्त्ता हरिष्यति ॥ मम तेजसा उपबृंहितः सन् ॥ ४२ ॥ तेजश्च अस्त्राणि च ॥ आयुधानि च संपद् इश्च भूयः प्राप्स्य ॥ महाकायः त्रिभुवनग्रासी स एवास्मान्हयादिति संकाकुलचित्तान् प्रत्याह ॥ मत्पराश्च के पिन हिंसंति ॥ अतो युष्माकं

युष्मभ्यं याचितो अश्विभ्यां धर्मज्ञो अंगानि दास्यति ॥ ततस्तैर आयुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ येन वृत्रशिरो हर्त्ता मत्तेजउपबृंहितः ॥ ४२ ॥ तस्मिंश्चिनिहते यूयं तेजोस्त्रायुधसंपदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान् ॥ ४३ ॥ इति श्री मद्भागवते महापुराणे षष्ठ स्कंधे नवमोध्यायः ॥ ९ ॥ श्री बादरायणिरुवाच ॥ इंद्र मेवं समादिश्य भगवान्विश्वभावनः ॥ पश्यतामनिमेषाणां तत्रैवांतर्दधे हरिः ॥ १ ॥ तथापि याचितो देवैर् ऋषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥ अपि वै दारका यूयं न जानीथ शरीरिणां ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥

भद्रमेवेति ॥ ४३ ॥ इति षष्ठे नवमः ॥ ९ ॥ दशमे केशवादिष्टदध्यङ्ङस्थिजवज्रभृत् ~~भूते~~ इंद्रो युध्यत वृत्रेण सासुरेण सनिर्ज्जरः १ मोदमान एव तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचष्टाण इवोवाच २ अपीति द्वाभ्यां हे दारकाः अपि किं संस्थायाम् मृत्यौ योऽभिद्रोहः दुःखं तन्न जानीथ ३ ॥ रामराम रामराम राम ॥ ऽऽ ॥ ऽऽ

भा० ष० शतघ्नी च चतुर्हस्ता लोहकंटकसंचिता ॥ भुशुंडी सर्वलोहकंटकानुक्रमोन्नतेत्यभिधानं ॥ १८ ॥ पुंखो मूलदेशः ॥ एक
६२ स्य मूलदेशमनु तत्संलग्नो यः परस्य पुंखो यथा भवति तथा नभसि स्थैर्यं नैर्ज्योतीषी वचेत्यनेन तेषां तदप्राप्तिः सूचिता ॥ १९ ॥ ता
मेवाह ॥ न ते इति अस्त्राणां च यानि वर्षाणि तेषां मोघाः ॥ न आसेदुः न प्रापुः ॥ सिद्धपथे आकाशमार्गे ॥ २० ॥ क्षीणा अस्त्राणि शस्त्रा

शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः ॥ सर्वतोऽवाकिरञ्छस्त्रैरस्त्रैश्च विबुधर्षभान् ॥ १८ ॥ न तेऽदृश्यंत
संछन्नाः शरजालैः समंततः ॥ पुंखानुपुंखपतितैर्ज्योतींषीव नभोघनैः ॥ १९ ॥ न ते शस्त्रास्त्रवर्षौघा ह्यासे
सि२ दुः सुरसैनिकान् ॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २० ॥ अथ क्षीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः
अभ्यवर्षन्सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २१ ॥ तानन्वतान्स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः
द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरेंद्रसैनिकान् ॥ २२ ॥ सर्वे प्रयासा अभवन्विमोघाः कृताः कृता
देवगणेषु दैत्यैः ॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रूषती रूक्षवाचः ॥ २३ ॥ ते स्वप्रयासं वितथं
निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥ २४ ॥

णां च अघा येषां गिरिशृंगैर्द्रुमैरुपलैश्च ॥ २१ ॥ तानिंद्रसैनिकान् शस्त्राणामस्त्राणां च पूगैः समूहैर्हतानप्यक्षतान्स्व
स्तिमतः सुखिनः द्रुमादिभिश्च अविक्षतान्निशाम्य दृष्ट्वा ॥ वृत्रो नाथो येषां ते तत्र सुमैर्नाः ॥ २२ ॥ कृताः कृताः पुनः कृताः कृष्णा
नुकूलो येषां तेषु देवगणेषु रूषती रूषत्यः ॥ अकल्याण्यः रूक्षाः परुषा वाचो यथा महत्सु व्यर्था भवंति तद्वत् ॥ २३ ॥ ह
तो युद्धदर्पो येषां देवगणेषु आत्तमहीतः सारो धैर्यं येषां ते ॥ अतिप्रसिद्धा अपि ते दैत्या एवं तेऽत्यस्य पोनः ॥ ते ६२

आजिमुखे युद्धारंभे पतिं विसृज्य पलायने मनो दधुः य
तो हरावभक्ताः ॥ २४ ॥

कृतंव्यवसितंयेनसआत्मानंतेजःसंनयन्नेकीकुर्वन्तनुंजहौ॥११॥यत्तात्त्वद्रष्टादयोयेनतत्त्वंपश्यतीतितथा॥ध्वस्तानिग
तानिबंधानियस्य॥१२॥अथेंद्रःअशोभतेइत्युत्तरेणान्वयः॥मुनेःशुक्तिभिःअस्थिभिःनिर्मितं॥उत्सिक्तःउर्जितःमुनिश

श्रीशुकउवाच॥एवंकृतव्यवसितोदध्यङ्ङाथर्वणस्तनुं॥परेभगवतिब्रह्मण्यात्मानंसंनयन्जहौ॥११॥यता
त्मासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबंधनः॥आस्थितःपरमंयोगंनदेहंबुबुधेगतं॥१२॥अथेंद्रोवज्रमुद्यम्यनिर्मितंविश्व
कर्मणा॥मुनेःशक्तिभिरुत्सिक्तोभगवत्तेजसान्वितः॥वृतोदेवगणैःसर्वैरथेंद्रःपर्यशोभत॥स्तूयमानोमुनिग
णैस्त्रिलोकींहर्षयन्निव॥१३॥वृत्रमभ्यद्रवच्छत्रुमसुरानीकयूथपैः॥पर्य्यस्तमोजसाराजन्क्रुद्धोरुद्रइवांतकं
॥१४॥ततःसुराणामसुरैरणःपरमदारुणः॥त्रेतामुखेनर्मदायामभवत्प्रथमेयुगे॥१५॥रुद्रैर्वसुभिरादित्यै
रश्विभ्यांपितृवह्निभिः॥मरुद्भिरृभुभिःसाध्यैर्विश्वेदेवैर्मरुत्पतिं॥दृष्ट्वावज्रधरंशक्रंरोचमानंस्वया
श्रिया॥नामृष्यन्नसुराराजन्मृधेवृत्रपुरःसराः॥१६॥नमुचिःशंबरोनर्वाद्विमूर्द्धाऋषभोवरः॥हयग्री
वःशंकुशिराविप्रचित्तिरयोमुखः॥पुलोमावृषपर्वाचप्रहेतिर्हेतिरुत्कलः॥दैतेयादानवायक्षारक्षां
सिचसहस्रशः॥सुमालिमालिप्रमुखाःकार्त्तस्वरपरिच्छदाः॥प्रतिषिध्येंद्रसेनाग्रंमृत्योरपिदुरासदं॥
अभ्यर्दयन्नसंभ्रांताःसिंहनादेनदुर्मदाः॥गदाभिःपरिघैर्बाणैःप्रासमुद्गरतोमरैः॥१७॥

क्तिभिरित्तिवापाठः॥१३॥असुरानीकानांयूथपैः॥पर्य्यस्तंपरिवृत्तं॥रणःसंग्रामः॥प्रथमेचतुर्युगेत्रेतायुगस्यमुखेआ

टी॰ ४९ ॥ भा॰ स्कं॰ ६ ॥ ४९ ॥ ८२ ॥

भा० पु० कालानुकूलैः कालानुवर्त्तिभिः ॥ काल्यमानां विद्राव्यमानां ॥ अमर्षितः असहमानः तां त्रिदशान्निवार्य्येति भर्त्स्य
६३ चेदं वक्ष्यमाणमुवाच ॥२॥ तदाह द्वाभ्यां मातुस्त्वरितैः ॥ पुरीषप्रायैः प्रथमं तत्पार्श्वे देवानां संबोधनं ॥ दृष्टतो हतैः दैत्यैः
किं न किंचित् न यशो नापि धर्मः तदेवाह न हीति ॥३॥ प्रधने संग्रामे सारं धैर्य्यं हे क्षुल्लकाः हे क्षुद्राः मात्रं क्षणमात्रं मे ऽ

विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥१॥ दृष्ट्वातप्यत संक्रु
द्ध इन्द्रशत्रुरमर्षितः ॥ तान्निवार्य्योजसा राजन्निर्भर्त्स्येदमुवाच ह ॥२॥ किं वः उच्चरितैर्मातुर्धावद्भिः पृष्ठतो
हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥३॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठ
मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥४॥ एवं सुरगणान्क्रुद्धो भीषयन्वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो ये
न लोका विचेतसः ॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥
६॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूल ओजसा नालं वनं
यूथपतिर्य्यथोन्मदः ॥७॥ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदां ॥ चिक्षेप तामापत
तीं सुदुःसहां जग्राह वामेन करेण लीलया ॥८॥

अग्रे तिष्ठत ॥ न चेदिह लोके स्पृहा अस्ति ॥४॥ सुरगणान् रि
पून् सुमहान्प्राणो बलं यस्य येन विचेतसो बभूवुः ॥५॥ वृत्रस्य विस्फोटनेन नादेन ॥६॥ उद्यतं शूलं येन ॥ नालं नल
नां वनं ॥ उद्धतो मदो यस्य यूथपतिर्गजो यथा मर्दयति ॥७॥ ८॥ ६३

प्रधावतःपलायमानानप्रेक्ष्यआदावेवत्रीव्रेणभयेनपलायितंभग्नंचतद्बलंसैन्यंतच्चप्रेक्ष्यएतद्वक्ष्यमाणंवभाषे
२५ तदेवविशिनष्टि॥कालोपपन्नामवसरोचितां॥मनस्विनांरुचिरां॥हेमयहेअनर्वेनमेवाचंश्रृणुत॥२६॥ततोमृत्योः
इहयशः॥लोकःस्वर्गश्चयदिस्यात॥अथतर्हिअमुंदत्युपयुक्तंसमीचीनंप्राप्तंवो॥२७॥ब्रह्मसंधारणयाकलेवरंजह्यादिति

वृत्रोःसुरांस्तानअनुगानमनःस्वीप्रधावतःप्रेक्ष्यबभाषएतत॥पलायितंप्रेक्ष्यबलंचभग्नंभयेनतीव्रेण
विहस्यवीरः॥२५॥कालोपपन्नांरुचिरांमनस्विनामुवाचवाचंपुरुषप्रवीरः॥हेविप्रचित्तेनमुचेपुलोमन्
मयानर्वञ्छंवरमेश्रृणुध्वं॥२६॥जातस्यमृत्युर्ध्रुवएवसर्वतःप्रतिक्रियायस्यनचेहक्लृप्ता॥लोको
यशश्चाथततोयदिह्यमुंकोनाममृत्युंनवृणीतयुक्तं॥२७॥द्वौसंमताविहमृत्यूदुरापौयद्ब्रह्मसंधार
णयाजितासुः॥कलेवरंयोगरतोविजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः॥२८॥इतिश्रीमद्भागवतेमहापुरा
तस्ये ६ णेषष्ठस्कंधेवृत्रवधेदशमोध्यायः॥१०॥श्रीशुकउवाच॥तएवंशंसतोधर्मंवचःपत्युरचेतसः॥नैवागृ

ह्णन्भयत्रस्ताःपलायनपरानृप॥१॥

यत्सएकोमृत्युः॥वीरशयेरणभूमौ॥अनिवृत्तःअपराङ्मुखःसनजह्यादितियत्सचैकस्तौ॥द्वाविहशास्त्रेसंमतौमृ ॥१॥
त्यूतथाचस्मृतिः॥द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ॥परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः॥इति॥२८॥इतिष
ष्ठेदशमः॥१०॥एकादशेतुवृत्रस्ययुध्यमानस्यवज्रिणा॥भक्तियोगश्चलोदर्काश्चित्रावाचोनुवर्णिताः॥१॥शंसतःकथयतः

ग्रात

तंवामस्पष्टवक्रिमदग्धदेहं समरंति ॥ वत्रमानसामिष्येवत्तमानवन्निर्दृश: ॥ १४ ॥ अन्येपियेत्रज्ञाः इहत्वा
त्वानशंसमनुमध्यमुधेतोस्त्राः संन्तोयद्दिप्रहरंति तेर्भतनाधानभेरवादीनयद्यामि ॥ कथंभूतैः ॥ निशं
तैतीक्ष्णीकृतपत्नेमतत्रिशूलैते नानिर्भिन्नागलोयेषांतैः ॥ १६ ॥ अथो ॥ अथवाहरेभोइंद्र ॥ यदिभवानेवममशि
क्षोश्रीदयालोस्त्रिभिरुक्रिंतंत्वांस्वकर्मणापुरुषादैश्वगर्ह्यं ॥ हेछेत्तामच्छूलविभिन्नेदेहमस्पष्ट
वक्त्रिंसमनदंत्तिगृध्राः ॥ १५ ॥ अन्येपियेत्वहनृशंसमज्ञायुध्युद्यमास्त्राः प्रहरंतिमह्यं ॥ तेभैरतनाधा
नसगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥ १६ ॥ अथोहरेमेकुलिशेनवीरहर्त्ताप्रमथ्यैववशि
रोयदीह ॥ तत्रानृणोभूतवलिंविधायमनस्विनांपादरजः प्रपत्स्ये ॥ १७ ॥ सुरेशकस्मान्नहिनोषि
वज्रंपुरस्थितेवैरिणिमय्यमोघं ॥ मासंशयिष्ठानगदेववज्रः स्यान्निष्फलःकृपणार्थेवयाच्ञा ॥ १८
नन्वेषवज्रस्तवशक्रतेजसाहरेर्दधीचस्तपसाचतेजितः ॥ तेनैवशत्रुंजहिविष्णुयंत्रितोयतोहरिर्विजयःश्रीर्गु
णाहत्तोहरिरेषाति ॥ नत्रत्तथासति अनृणोकर्मवंधःसन्भूतेभ्योवलिंदेहेनविधायमनस्विनांपादरजःप्रपत्स्ये धीराणां पदं
प्राप्स्यामि ॥ १७ ॥ जीवितादपिमृत्युरेवममाभिमतइत्याशयेनाह ॥ सुरेशेति ॥ नहिनोषि नक्षिपसि गदेववविफलेतोयास्य
तीतिसंशयंमाकार्षीः ॥ कृपणार्थेःप्रयोजनंयस्याःसा ॥ याचयथानिःफलातथानस्यात् ॥ १८ ॥ अमोघत्वेहेतुंवदन्
तंप्रोत्साहयति ॥ नन्विति तेजितस्तीक्ष्णीकृतः शत्रुंमांजहि ॥ विष्णुनायंत्रितःप्रेरितः ॥ १९ ॥

६

॥ स प्रधनुःप्रमाणं देशं ॥ १० ॥ स नो वृत्रसखो वाहोयस्य तस्मैन प्रायुंक्त ग्रामृत तस्यंदी श्रमृत तस्तावीयः स्वकरः तेताभिम
र्शीः तेनवीतव्यथोगत दुःख ॥ स्तनो वाहोयस्य दृश्यसत्तेयाभूतोऽवतस्थे ॥ ११ ॥ स वृत्तः हेन्द्रपेंद्र ॥ श्राहवकाम्यया युद्धेच्छया
ऽवस्थितं भ्रातरं भ्रातरं विश्वरूपं हतवंतं ॥ न्वशंसक्रूरं ॥ तदेवाह ॥ पापं तस्य कर्म स्मरन् ॥ १२ ॥ यो ब्रह्महा ब्राह्मणं हत

स इंद्रशत्रुः कुपितोभृशं तया महेंद्रवाहं गदयोरुविक्रमः ॥ जघान कुंभस्थलमुन्नदन्मृधे तत्कर्म सर्वे
समपूजयन्नृप ॥ १९ ॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोद्रिः कुलिशाहतो यथा ॥ अपासरद्भिन्नमुखः स
हेंद्रो मुंचन्नसृक्सप्तधनुर्भृशार्तः ॥ २० ॥ न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः सगदां महात्मा ॥ इं
द्रोमृतस्यंदिकराभिमर्शवीतव्यथक्षतवाहोवतस्थे ॥ २१ ॥ स तं नृपेंद्राहवकाम्यया रिपुं वज्रायुधं
भ्रातृहणं विलोक्य ॥ स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसन्जगाद ॥ २२ ॥ वृत्र उवाच ॥ दिष्ट्या भवा
न्मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ॥ दिष्ट्यानृणोद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृष
द्धृदाचिरात् ॥ २३ ॥ यो नोग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ॥ विश्रभ्य खड्गेन शिरांस्यवृश्चत्पशो
रिवाकरुणः स्वर्गकामः ॥ २४ ॥

वान् विशेषतः स्वगुरुं मम च भ्रातरं स भवान् ग्रतः समवस्थितः ॥ एतद्दिष्ट्या भद्रं जातं ॥ दिष्ट्या त्वय्य यमानंदार्थे ॥ हे त्र
सत्तम मम शूलेन निर्भिन्नं दृषत्तुल्यं हृत् हृदयं यस्य तेन त्वया निमित्तेन मृतेन ॥ अद्य अचिरादेव भ्रातुरनृणो हं
स्यां एतद्दिष्ट्या ॥ २३ ॥ स्वर्गकामो यो भवान् अवृश्चत् ॥ स्वर्गकामो याज्ञिकः पशोरिवेतिवा ॥ २४ ॥

भा०ष०
६५

नतुदास्येनकिंतुभ्यंमहाफलानिदास्यामितत्राह॥नाकपृष्ठंध्रुवपदंब्रह्मलोकादिकंच॥हेसमंजसनिखिल
सौभाग्यनिधे॥त्वात्वांविरहय्यपृथक्कृत्यनकांक्षेनेच्छामि॥२५॥नहिकिमिच्छसितत्राह॥अजातपक्षाःख
गाः॥भयादिभिःपीडितायेथामातरं॥यथाचदाम्नावबद्धावालवत्साःस्तन्यं॥यथाचव्युषितंदूरदेशगतंप्रियंका
ननाकपृष्ठंनचपारमेष्ठ्यंनसार्वभौमंनरसाधिपत्यं॥नयोगसिद्धीरपुनर्भवंवासमंजसत्वाविरहय्य
कांक्षे॥२५॥अजातपक्षाइवमातरंखगाःस्तन्यंयथावत्सतराःक्षुधार्त्ताः॥प्रियंप्रियेवव्युषितंविषण्णाम
ते ३ नोरविंदाक्षदिदृक्षतेत्वां॥२६॥ममोत्तमश्लोकजनेषुसख्यंसंसारचक्रेभ्रमतःस्वकर्मभिः॥त्वन्मायया
त्मात्मजदारगेहेष्वासक्तचित्तस्यननाथभूयात्॥२७॥इतिश्रीमद्भागवतेमहापुराणेषष्ठस्कंधेएकाद
शोऽध्यायः॥११॥श्रीऋषिरुवाच॥एवंजिहासुर्नृपदेहमाजौमृत्युंवरंविजयान्मन्यमानः॥शूलंप्रगृह्या
भ्यपतत्सुरेन्द्रंयथामहापुरुषंकैटभोऽप्सु॥१॥
मेनविषण्णाप्रियानयथामेमनस्तापत्रयपीडितंकर्मभिर्बद्धंचकामादिभिर्विषण्णंचत्वांदिदृक्षतेद्रष्टुमिच्छतीत्य
र्थः॥२६॥उत्तमश्लोकस्यचतवजनेषुभक्तेषुचसख्यंभूयात्॥त्वन्माययादेहादिष्वासक्तचित्तस्यमेयोपितेष्वासक्ति
र्नभूयात्॥२७॥इतिषष्ठेएकादशः॥११॥द्वादशेतुविषण्णेनस्वयमुत्साहितेनेन्द्रेण॥महेंद्रेणमहायुद्धेवृत्रस्यवधई
र्यते॥१॥महापुरुषंश्रीविष्णुं॥अप्सुप्रलयोदके॥१॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ६५

हननेममपीडास्यादित्यपिमांशंसयिष्टा इत्याह ॥ अहमिति ॥ संकर्षणेनमत्पतियथाह ॥ तयात्तदीयचरणारविंदेम
नःसमाधायमुनेर्योगिनोगतिमहंयास्यामि तववज्रस्यरंहसालुलितः छिन्नोग्राम्यपाशोविषयभोगलक्षणोयस्य
अपविद्धलोकः त्यक्तदेहः ॥ २० ॥ तर्हिभगवान्संकर्षणःस्वभक्तत्यायमद्यैमेवस्वर्गादिसंपदोदास्यतीत्यपिमाशं
सयिष्टा इत्याह ॥ पुंसामिति ॥ स्वर्गभूमौरसातलेच ॥ याःसंपदस्ताकिलनिश्चितंनराति नददाति नत्रहेतु यतयाम्यः

अहंसमाधायमनोयथाहसंकर्षणस्तच्चरणारविंदे ॥ त्वद्वज्ररंहोलुलितग्राम्यपाशोगतिंमुनेर्या
म्यपविद्धलोकः ॥ २० ॥ पुंसांकिलैकांतधियांस्वकानांयाःसंपदोदिविभूमौरसायां ॥ नरातियद्द्वेषउद्वे
गआधिर्मदःकलिर्व्यसनंसंप्रयासः ॥ २१ ॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्तेपुरुषस्यशक्र ॥ त
तोऽनुमेयोभगवत्प्रसादोयोदुर्लभोकिंचनगोचरोन्यैः ॥ २२ ॥ अहंहरेतवपादैकमूलदासानुदासोभवि
तास्मिभूयः ॥ मनःस्मरेतासुपतेर्गुणांस्तेगृणीतवाक्कर्मकरोतुकायः ॥ २३ ॥

द्वेषादयोभवंति ॥ २१ ॥ तर्हिस्वभक्तस्यकिंविधत्तेतत्राह ॥ त्रैवर्गिकोधर्मार्थकामविषयोयत्रायासस्तस्यविघातंवि
धत्ते ॥ ततश्चायुसोपरमाद्देवानुमेयनत्वं ॥ स्वर्गादिनाअतःसम्यक्भगवत्प्रसादाभावात्तत्वसंपदोभविष्यतीतिभावः
२२ ॥ एवमिंद्रायस्वाभिप्रायंनिवेद्यभगवंतंप्रार्थयन्ते ॥ अहमिति ॥ तवपादावेवएकंमूलमाश्रयोयेषांतेषांदासानाम
नुदासः ॥ भूयोभवितास्मिभविष्यामिभवेयं ॥ असुपतेःप्राणनाथस्यतवगुणान्ममनःस्मरतु ॥ वागपितानेवकीर्तयतु

भा० पु०
९६

पराधीनतामेवाह ॥ लोका इति सप्तभिः ॥ यस्य वशे स्थिताः स्वयं विवशाः संतः स्वसंति चेष्टंते ॥ द्विजाः पक्षिणः ॥ शिचा
जालेन कालयतीभगवानत्र इहजयादौ कारणं ॥ ८ ॥ ओजःसादि रूपकालं तद्धेतुमज्ञाय जडं सन्तमात्मानं देहं हेतुं म
न्यते ॥ ९ ॥ १० ॥ ननु स्वारंभकप्रधानपुरुषादितं त्राणमिति युक्तं तत्राह ॥ पुरुष इति व्यक्तं महत्तत्वं ॥ आत्मा हंकारः ॥ ११
लोकाः सपालाय स्येमे श्वसंति विवशा वशे ॥ द्विजा इव शिचाबद्धाः स काल इह कारणं ॥ ८ ॥ ओजः
सहोवलं प्राणममृतं मृत्युमेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडं ॥ ९ ॥ यथा दारुमयी यो
षित्पुत्र्यायंत्रमयो मृगः ॥ एवं भूतानि मघवन्नीशतंत्राणि विद्धि भोः ॥ १० ॥ पुरुषः प्रकृतिर्व्यक्तमात्मा भू
तेंद्रियाशयः ॥ शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥ अविद्वानेवमात्मानं मन्यतेनी
शमीश्वरं ॥ भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं ॥ १२ ॥ आयुः श्रीः कीर्त्तिरैश्वर्यमाशिषः पुरुषस्य
याः ॥ भवंत्येव हि तत्काले यथानिच्छोर्विपर्ययाः ॥ १३ ॥ तस्मादकीर्त्तियशसोर्जयापजययोरपि ॥ स
मः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥ १४ ॥
ननु स्वकर्मद्वारा जीव एव स्रष्ट्रादिहेतुरिति मीमांसका मन्यंते तत्राह ॥ एवमविद्वान् अनीशमेवात्मानं ईश्वरं स्वातं
त्र्यमभ्यंते ननु पित्रादयः स्रष्टारो दृश्यंते ॥ घ्राघ्रादयस्तु हंतारस्तत्राह ॥ भूतैरिति स्वयं ईश्वरः ॥ १२ ॥ ननु त्वयापराजि
तस्य मम मरणादिशंके व नास्ति किमिति मां वलान्न युद्धे प्रवर्त्तयसि तत्राह ॥ आयुरिति तत्काले जयादिकाले विप
र्य्ययः ॥ अकीर्त्यादयः ॥ यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्यात् हर्षविषादहीनो भवेत् ॥ १४ ॥ ॥ ऽऽ ॥ ९६

युगांताग्निवत्कठोरजिह्वा शिखायस्य तत् ॥ आविध्य भ्रामयित्वा ॥ २ ततः खेत्रापतत् ॥ आगच्छत् ॥ विचलत् परिभ्रामत्
ग्रहः स च उल्का च महोल्कं तत् दुःप्रेक्ष्यं ॥ शतपर्वा कुलिशः यस्य ते नु तक्षः राजो वासुकिः ॥ तस्य भोगी देहः तत् दाकारं ॥ ३ हनौ कपो
लप्रांते ॥ अमरेभमैरावतं च ॥ ४ ॥ ५ पुनश्चात् माह वृत्रः हे इंद्र ॥ ६ तदा जयो नैव ॥ किंतु कुत्रचिज्जयः ॥ एकत्र कुत्र कु
ततो युगांताग्निकठोरजिह्वमाविध्य शूलं तरसासुरेंद्रः ॥ क्षिप्त्वा महेंद्राय विनद्य वीरो हतोसि पापेति रु
षा जगाद ॥ १ ख आपतत्तद्विचलत् ग्रहोल्कवन्निरीक्ष्य दुःप्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शत
पर्वणाच्छिनद्भुजं च तस्योरगराजभोगं ॥ ३ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीत
वज्रं ॥ हनौ ततादेंद्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ वृत्रस्य कर्मातिमहाद्भुतं तत्
रा॰ १ सुरासुराश्चारणसिद्धसंघाः ॥ अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशं ॥ ५
६६ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसंनिधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषा
दकालः ॥ ६ युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनां ॥ विनैकमुत्पत्तिलयस्थितीश्वरं
सर्वज्ञमाद्यं पुरुषं सनातनं ॥ ७ ॥
त्रचिन्नैव ॥ यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव ॥ किंतु एकत्रैव कदाचिद्दैवतः पर्येः परो देह आत्मा येषाम् ॥ प
राधीनात्मनामितिवा ॥ आद्यम् ॥ अनादिम् ॥ सनातनम् ॥ नित्यम् ॥ ८ ॥ ॥ राम राम राम राम राम राम

हे मारिष श्रेष्ठ राजन् ॥२४॥२५॥ उत्कृत्तं मूलं ययोस्ताभ्यां रक्तस्रवतीति तत्र यथा गोत्रः पर्वतः ॥२६॥ कृत्वाधरामित्यादेर्जग्रासे
त्यनेनान्वयः ॥ नभोवद्गंभीरेण वक्त्रेण लेलिहः सर्पस्तद्वत् उल्वणया जिह्वया कालकल्पाभिः ग्रसन् चात्तयन्नति
ज्जरयन् चूर्णयन् ॥ महाप्राणेन महावलेन ॥ महाप्रभावः ॥२७॥२८॥ महापुरुषेणैकवचरूपेण श्रीनारायणेन सन्नद्धेन

आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः ॥ इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिषः ॥२४॥ स तु वृत्रस्य परिघं
करं च करभोपमं ॥ चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥२५॥ दोर्भ्यामुत्कृत्तमूलाभ्यां वभौ रक्तस्रवोऽसु
रः ॥ छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥२६॥ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं ॥ नभोगंभीरवक्त्रे
ण लेलिहोल्वणजिह्वया ॥ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयं ॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गि
रीन् ॥ गिरिराट् पादचारीव पद्भ्यां निर्जरयन्महीं ॥ जग्रास स समासाद्य वज्रिणं सहवाहनं ॥ महाप्राणो महावीर्यो म
हासर्प इव द्विपं ॥२७॥ वृत्रग्रस्तं तमालोक्य सप्रजापतयः सुराः ॥ हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥२८॥
निगीर्णोऽप्यसुरेंद्रेण न ममारोदरं गतः ॥ महापुरुषसन्नद्धो योगमायाबलेन च ॥२९॥ भित्त्वा वज्रेण तत्कुक्षिं नि
ष्क्रम्य वलभिद्विभुः ॥ उच्चकर्त शिरः शत्रोर्गिरिशृंगमिवौजसा ॥३०॥ वज्रस्तु तत्कंधरमाशुवेगः कृंतन्समंतात्प
रिवर्तमानः ॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥३१॥

शितः ॥ योगबलेन मायाबलेन च ॥२९॥ वल
भित् इंद्रः ॥ उच्चकर्त चिच्छेद ॥३०॥ तस्य कंधरां आशुवेगः अतिवेगवान् ॥ ज्योतिषां सूर्यादीनां अयने दक्षिणोत्तरगतिरूपे सं
वत्सरे योऽहर्गणः ॥ षष्ट्युत्तरशतत्रयात्मकः ॥ ते च तावदहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्ये कालेन्यपातयत् ॥ यद्वा स्वार्थे

श्री २

समरहष्टावुपायमाह । सत्वमिति ह्यर्वादिभिर्न्न बध्यते ॥ १५ ॥ हर्षविषादनिवृत्त्यैतवाहमेव कुरुरित्याह । पश्येति द्वकम्मायु
धं भुजं च यस्य ॥ १६ ॥ अनिपतत्वं दृष्टांतरूपकेणोपसंहरति । प्राणास्य वृत्तहः पणो यस्मिन् । बाहनान्येव हस्तादीनि तत्र
तेश्चाल्यमानानि । आसनानि फलकायस्मिन् ॥ १७ ॥ गतोलीकं निष्कपट ॥ १८ ॥ भक्तः सेवितवानसि ॥ १९ ॥ तस्य तत्र वखा

सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ तत्र साक्षिणमात्मानं यो वेद स न बध्यते ॥ १५ ॥ पश्य मां निर्जि
तशत्रु वृक्णायुध भुजं मृधे ॥ घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥ १६ ॥ प्राणग्लहोयं समर इष्वक्षो वा
हनासनः ॥ अत्र न ज्ञायतेमुष्यजयोमुष्यपराजयः ॥ १७ ॥ श्रीशुक उवाच ॥ इंद्रो वृत्रवचः श्रुत्वा गतालीक
मपूजयत् ॥ उद्यतवज्रः प्रहसंस्तमाह गतविस्मयः ॥ १८ ॥ अहो दानव सिद्धोसि यस्य ते मतिरीदृशी ॥ भक्तः
सर्वात्मनात्मानं सुहृदं जगदीश्वरं ॥ १९ ॥ भवानतारीत्सन्मायां वैष्णवीं जनमोहिनीं ॥ यद्विहायासुर
भावं महापुरुषतां गतः ॥ २० ॥ खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव ॥ वासुदेवे भगवति सत्वात्मनि
दृढा मतिः ॥ २१ ॥ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ॥ विक्रीडतोमृतांभोधौ किं क्षुद्रैः खातको
दकैः ॥ २२ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ॥ युयुधातेमहावीर्याविंद्रवृत्रौ
युधांपती ॥ २३ ॥

तकोदकैः । गर्त्तैर्द्दिजलोद्भवैः पमैः स्वर्गादिभिः किं ॥ २२ ॥ युद्धानां संग्रामाणां पती मुख्यौ ॥ २३ ॥ एमरामराम

भा० ष० तस्य हरेरिंद्रस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह ॥ वृत्रविक्रमेत्यादिना ॥ प्रार्थयन् प्रार्थयंतः ॥ रहहधात ब्राह्मण

६८ वधात्भीतस्सन् ॥४॥ एनः पापं विभक्तेचिभज्य गृहीतमाज्ञिर्निशोधयोमि ॥५॥६॥७॥८॥ वृषाकपिमिंद्रम् ॥१०॥

श्रीशुक उवाच ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ॥ तदर्थायार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधा

त् ॥४॥ इंद्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहं ॥५॥ श्री

शुक उवाच ॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् ॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥६॥

हयमेधेन पुरुषं परमात्मानमीश्वरं ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥७॥ ब्रह्महापि

द०२ तृहा गोघ्नो मातृहाचार्यहाघवान् ॥ श्वादः पुल्कसको वापि शुध्येरन्यस्य कीर्तनात् ॥८॥ तमश्व

मेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन ॥ हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं ख ह२

लनिग्रहेण ॥९॥ श्रीशुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं ॥ ब्रह्महत्या हते तस्मि

मा न्नाससाद वृषाकपिं ॥१०॥ तयेंद्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत् ॥ ह्रीमंतं वाच्यतां प्राप्तं सुख

यंत्यपि न गुणाः ॥११॥

तया देवादिभिः कारितया ॥ स्मेत्यवधारणे इंद्र एव तापमसहत नान्यः ॥ ह्रीमंतं लज्जायुक्तं वाच्यतां निं

द्यमुमिंद्रं निर्वृतिर्नाविशत् ॥ ननु घोरेऽध्यादियुक्तस्य कुतोऽनिर्वृतिस्तत्राह ६८

वृत्रलिंगैर्मंत्रैः वृत्रहंतुर्वीर्य्यप्रकाशकैः वार्त्रहत्याय शवसे पृतनासाह्याय चेत्याद्यैस्तमिंद्रमभिष्टुवाना अभिष्टु
वंतः ३४ अलोकंल्लोकातीतं भगवंतं ॥ २३ ॥ इति षष्ठे ह्ब्द शः ॥ १८ ॥ त्रयोदशेतु वृत्रस्य ब्रह्महत्यामहाभयात् ॥ चिरं नष्टो वि
तः शक्रो विष्णुनेति निरूप्यते ॥ अनिर्वृत्तं शक्रकृतं दृष्ट्वा स्वयमेव प्रतिजग्मुः ॥ वार्त्रहत्याय इंद्र एतत्सर्वमपश्यदिति श्रुतेः
तदाच देवेंद्रं दुर्नयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमै
रभ्यवर्षन् ॥ ३४ ॥ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानाममलोकं समपद्यत ॥ ३५ ॥
इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे वृत्रवधो नाम द्वादशोध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ वृत्रे हते त्र
यो लोका विना शक्रेण भूरिद ॥ सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः ॥ १ ॥ देवर्षिपितृभूतानि दैत्या
देवानुगाः स्वयं ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः ॥ २ ॥ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतु
मिच्छामि भो मुने ॥ येनासन्सुखिनो देवा हरेर्दुःखं कुतो भवत् ॥ ३ ॥
प्रथमे गायत्रीत्रिष्टुभौ ॥ इंद्रो वृत्रहा देवता वृत्रहत्याय ॥ वृत्रो येन सवसा बलेन हन्यते तद्वार्त्रहत्यं शवः तस्मै वार्त्रह
त्याय शवसे पृतनाषाह्याय च पृतनाः संग्रामाः येन शवसा अभिभूयंते तत्पृतनासहं बलं ॥ तस्मै पृतनासहा
य सहति ॥ अभिभवार्थः ॥ हे इंद्र त्वा आवर्तयामसि आवर्तयामः १ ॥ २ ॥ ३ ॥ एमरामरामरा एमरामराम

ततः इंद्रः स्वर्गं गतः प्राप्तः कथंभूतः ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः ऋतंभरः सत्यपालको हरिः ॥ तस्य ध्याने
नेन निवारितं अघं येन ॥ प्राक् अपि हि तु पापो ब्रह्मवधस्तमिंद्रं नाभ्यभूत् तत्स्याभिभवं नाकरोत् ॥ कुतः दिग्देवतया प्रा
गुदीच्यां दिशि स्थितया श्रीरुद्रेण अवितं रक्षितं सत् ॥ १६ ॥ पुरुषस्य हरेराधनं यस्मिंस्तेन ॥ १७ ॥ सर्वदेवमय आत्मा

ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवि
तं विष्णुपत्न्या ॥ १६ ॥ तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत ॥ यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह ॥ १७ ॥
अथेज्यमाने पुरुषे सर्वदेवमयात्मनि ॥ अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः ॥ स वै त्वाष्ट्रवधो भूया
नपि पापचयो नृप ॥ नीतस्तेनैव शून्याय नीहार इव भानुना ॥ १८ ॥ स वाजिमेधेन यथोदितेन वि
तायमानेन मरीचिमिश्रैः ॥ इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः ॥ १९ ॥ इदं महाख्या
नमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनं ॥ भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेंद्रमोक्षं विजयं मरुत्वतः ॥ २० ॥

मूर्तिर्यस्य तस्मिन् सर्वदेवात्मनीति वा पाठः ॥ ब्रह्मवादिभिर्वितते अनुष्ठिते अश्वमेधे महेंद्रेण इज्यमाने पुरुषे सति
तेनैव पुरुषेणैव शून्याय नीतः नाशित इत्यर्थः ॥ १८ ॥ अधियज्ञाय ज्ञायेन तं ॥ १९ ॥ पापानि विधातुमाख्यानं स्तौति इ
दमिति ॥ प्रक्षाल्यतेऽनेनेति प्रक्षालनं ॥ तीर्थपादस्यानुकीर्तनं यस्मिन् ॥ भक्तेरुच्छ्रयो यस्मिन् ॥ भक्तजनानामनुवर्णनं
यस्मिन् ॥ महेंद्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषेण जयो यस्मिन् ॥ २० ॥

॥१२॥

यक्ष्मग्रस्तां ॥ क्षयरोगव्याप्तां ॥ मीनस्येव गंधो यस्य स मीनगंधिः ॥ स चासाववसुचिर्वीर्युक्तस्य गंधेन ॥ १२ ॥ प्रागुदीचीदि
शंगतः सन् तूर्णं मानसंसरः प्रविष्टः ॥ १३ ॥ स इंद्रः सहस्रं वर्षाणि पुष्करनालतंतुना वसत् कथंभूतः नलब्धो भोगो
येन सः कुतः यतः यस्मात् इह नाले वसत ॥ अग्निदूतश्चस्त्वयं अग्नेरेष्य दूतस्य हविर्भागात्ते तु जलप्रवेशासंभवादलब्ध
भाग इत्यर्थः ॥ पाठांतरे नलब्धो यज्ञभागो येन सः ॥ १४ ॥ त्रिनाकं ॥ नत्रिकं दुःखं यस्मिन्निति नाकः पुण्यश्लोकः ॥ तृतीयो नाकं

तां ददर्शानुधावंतीं चांडालीमिव रूपिणीं ॥ जरयावेपमानांगीं यक्ष्मग्रस्तामसत्कृपटां ॥ १२ ॥ विकीर्य्यपलितान्के
शान्क्लिष्टतिष्ठितिवादिनी ॥ मीनगंध्यसुगंधेन कुर्वंतीमार्गदूषणं ॥ १३ ॥ नभोगान्तो हि दिशः सर्वाः सहस्राक्षो विशी
पन्ने ॥ प्रागुदीचीदिशं तूर्णं प्रविवेशान्नपमानसं ॥ १३ ॥ स आवसन्पुष्करनालतंतनन्नलब्धभोगो यदि हाग्निदूतः
वर्षाणि साहस्रमलक्षितोऽंतः स चिंतयन्नवधिर्वधाहिमोक्षे ॥ १४ ॥ तावत्त्रिणाकं नहुषः प्रशास्तो विद्योतपो
योगबलानुभावः ॥ समं पदं ऐश्वर्यमदांधबुद्धिर्नीतस्तिरश्चागतिमिंद्रपत्न्याः ॥ १५ ॥ नि ३

सर्गं ॥ न तु मनुष्यस्य कुतः स्वर्गराज्यं तत्राह विद्याभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य सः ॥ तर्हि तस्मिन्सति कथमिंद्रस्य
पुनः स्वर्गप्राप्तिस्तत्राह ॥ स नहुषः संपदैश्वर्याभ्यां योमदस्तेनांधा बुद्धिर्यस्य सः इंद्रपत्न्याः सख्याः तिरश्चां गतिं सर्पयोनिं नीतः उ
पायेन प्रापितः एवं व्याख्यायते ॥ नहुषः किल कदाचिदिंद्राणीमुवाच ॥ इंद्रस्त्वावदहं तत त्वं मां भजेति ॥ तया चावेदितं ग्रंथौ बृह
स्पतिस्तामुवाच ॥ ब्राह्मणवाहशिबिकामारुह्यागतं त्वां भजिष्यामीति ब्रूहि ततो सोऽब्रह्मशापात्पतिष्यतीति ॥ तया च तथोक्तो न

न्त्रेंद्रियादिभिः कृतसंशरणं गत इत्याह ॥ यःपौरुषेणेति ॥ ७ ॥ ८ ॥ यथाप्रथावच्छृणु ॥ ९ ॥ १० ॥ भार्य्यासहस्राणांकोटि
रित्यर्थः ॥ सांतानिकः स्वयं संतानार्होपि पुत्रोत्पादनसमर्थोपि ॥ तासु संततिं न लेभे ॥ सर्वास्ता वंध्या एव दैव

अत्र नः संशयो भूयांश्छ्रोतुं कौतूहलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥ ७ ॥ सूत उवाच ॥ प
रीक्षितो ऽथ संप्रश्नं भगवान्बादरायणिः ॥ निशम्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत् ॥ ८ ॥ श्रीशुक उवा
च ॥ शृणुष्वावहितो राजन्नितिहासमिमं यथा ॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥ आसीद्राजा सार्व
भौमः शूरसेनेषु वै नृप ॥ चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्मही ॥ १० ॥ तस्य भार्य्यासहस्राणां सहस्राणि
दशाभवन् ॥ सांतानिकश्चापि नृपो न लेभे तासु संततिं ॥ ११ ॥ रूपौदार्य्यवयोजन्मविद्यैश्वर्य्यश्रियादिभिः
संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापतेरभूत् ॥ १२ ॥ न तस्य संपदः सर्वा महिष्यो वामलोचनाः ॥ सार्वभौम
स्य भूश्चेयं न भवन्प्रीतिहेतवः ॥ १३ ॥ तस्यैकदा तु भवनमंगिरा भगवानृषिः ॥ लोकाननुचरन्नेतानु ६२
या १ पागच्छद्यदृच्छया ॥ १४ ॥ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीदत्सुखासीनं समा
हितः ॥ १५ ॥

योगेन मिलिता इति भावः ॥ ११ ॥ तदेवाह वंध्यापतेरिति ॥ १२ ॥ १३ ॥ १४ ॥ उपासीदत् तस्य समीपं उपविवेश समा
हितः संयतः ॥ १५ ॥

इंद्रियं तत्पापदवकरं इंद्रसंवंधीति वा ॥ आयुषमायुष्यं ॥ २२ ॥ इति षष्ठे त्रयोदशः ॥ १३ ॥ वृत्रस्य ज्ञानभक्त्यादि श्रुत्वाश्चर्यं च प
रीक्षिता ॥ हेतुमाह चतुर्भिस्तत्प्राक्जन्मचरितांत्रिभिः ॥ चतुर्दशे तु सहसा कं चू[illegible] लब्धे सुतेऽघ्नते ॥ चित्रकेतोरति
स्नेहाद्दतिशोको निरूप्यते ॥ रजस्तमःस्वभावस्य ॥ १ २ ॥ भक्तेर्दुर्लभत्वं प्रपंचयति त्रिभिः ॥ पार्थिवैरजोभिः प

क्के पुराख्यानमिदं सदा बुधाः शृण्वंत्यथो पर्वणि पर्वणींद्रियं ॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंज
यं स्वस्त्ययनं तथायुषं ॥ २१ ॥ २३ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ राजोवाच ॥ र ५३
जस्तमःस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः ॥ नारायणे भगवति कथमासीद्दृढा मतिः ॥ १ ॥ देवानां शुद्ध
सत्वानामृषीणां चामलात्मनां ॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥ २ ॥ रजोभिः समसंख्याताः
पार्थिवैरिह जंतवः ॥ तेषां ये केचनेहंते श्रेयो वै मनुजादयः ॥ ३ ॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजो
त्तमाः ॥ मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥ ४ ॥ मुक्तानामपि सिद्धानां नारायणपरायणः
सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ॥ ५ ॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृ
ष्ण आसीत्संग्राम उल्बणे ॥ ६ ॥

रमाणुभिः समसंख्याताः अनंता इत्यर्थः ॥ जंतवो जीवाः ॥ तेषां मध्ये ये केचन कतिपये धर्ममीहंते ॥ कुर्वंति
३ ॥ मुच्यते गृहादिसंगात् ॥ मुच्यते सिध्यति ॥ तत्त्वं जानाति ४ ॥ ५ ॥ ६ ॥

 आत्माभवान् ॥ आत्मनो न प्रीयते न तुष्यति ॥ न किं परं तो वा अलब्धकामं त्वांल्लक्षये ॥२१॥ विदुषा सर्वज्ञेनापि ॥२२॥ अ
 लब्धकामत्वं कथयन् ॥ उत्तरेयाचत्ते ॥ भगवन्निति चतुर्भिः ॥२३॥२४॥ अप्रजमपुत्रं ॥ इति त्रं ड्मां अन्नपानकामं च अपरे त्व

आत्मनः प्रीतये नात्मा परतः स्वत एव वा ॥ लक्षयेऽलब्धकामं त्वां चिंतया सबलं मुखं ॥२१॥ एवं विकल्पितो ए
जन्नू विदुषा मुनिनापि सः ॥ प्रश्रयावनतोभ्याह प्रजाकामस्ततो मुनिं ॥२२॥ चित्रकेतुरुवाच ॥ भगवन्किं न वि
दितं तपोज्ञानसमाधिभिः ॥ योगिनां ध्वस्तपापानां बहिरंतः शरीरिषु ॥२३॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि
चिंतितं ॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥२४॥ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः
न नंदयंत्यप्रजं मां क्षुत्तृट्कामम् इवापरे ॥२५॥ ततः पाहि महाभाग पूर्वैः सह गतं तमः ॥ यथा तरेम
दुस्तारं प्रजया तद्विधेहि नः ॥२६॥ श्री शुक उवाच ॥ इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ॥
श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥२७॥ ज्येष्ठा [illegible] च या राज्ञो महिषीणां च भारत ॥ नाम्ना कृ श्रेष्ठा
तद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्द्विजः ॥२८॥ अथाह नृपतिं राजन्भवितैकस्तवात्मजः ॥ हर्षशोक
प्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥२९॥

कं च वनादयो यथा न सुखयंति ॥२५॥ पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमः ॥ नरकं प्रजया यथा तरेम तथा
विधेहि ॥२६॥ यज्ञोच्छिष्टं यज्ञशेषं ॥२८॥ जन्मना हर्षं मरणेन च शोकं प्रदास्यतीति तथा इति एवमुक्त्वा ययौ ॥२९॥

१६ ॥ अपि किं ॥ अनामयमारोग्यं स्वस्तिशुभम् ॥ प्रकृत्यधीनमेव हि राज्यमिति स दृष्टांतमाह ॥ यथा मरुद्भिः प्रकृ
तिभिः ॥ पुमान् जीवो नित्यं गुप्तो भवति ॥ न तु तद्व्यतिरेकेण त्राणमपि तिष्ठति ॥ तथा च राजा सप्तभिः स्वाम्यमात्यज
नपददुर्गद्रविणसंचयाः ॥ दंडो मित्रं च तस्यैताः सप्त प्रकृतयो मताः इत्युपलक्षणाभिः नित्यं गुप्तः सन् आत्मानं
प्रकृतिषु अध्यासात्सन्निधाय ॥ तदनुवर्तिनं कृत्वा श्रेयो राज्यसुखं प्राप्नुयादित्यर्थः ॥ स्वामी गुरुः स्वयं वा मंत्र

महर्षिस्तमुपासीनं प्रश्रयावनतं स्थितौ ॥ प्रतिपूज्य महाराजं समाभाष्येदमब्रवीत् ॥ १६ ॥ अंगिरा
उवाच ॥ अपि तेनामयं स्वस्ति प्रकृतीनां तथात्मनः ॥ यथा प्रकृतिभिर्गुप्तः पुमान् राजा च सप्तभिः ॥ १७
आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ॥ राजा तथा प्रकृतयो नरदेवाहिताधयः ॥ १८ ॥ अपि दाराः
प्रजामात्याः भृत्याः श्रेण्यो पमंत्रिणः ॥ पौरा जानपदा भूपा आत्मजा वशवर्तिनः ॥ १९ ॥ यस्यात्मानुवशश्चेत
स्यात्सर्वे तद्वशगा इमे ॥ लोकाः सपाला यच्छंति सर्वे वलिमतंद्रिताः ॥ २० ॥ सहायो मित्रं कर्मसहायोऽमात्य इति मं

दः ॥ प्रकृतीनां च सुखं राजाधीनमेवेत्याह ॥ हे नरदेव ॥ तथा प्रकृतयोऽपि राज्ञा आहिताधयः निहितनिक्षेपाः धनैः समृद्धा भवं
ति पागंतरे आसमंततो आधयो निरस्तमनोदुःखा भवंतीत्यर्थः ॥ १८ ॥ प्रजाश्च अमात्याश्च श्रेण्यश्च समं विशेषेण संयशो वर्तमाना
वणिक्प्रभृतयः पौराः पुरवासिनः ॥ जानपदाः ॥ तत्तद्देशाधिकारिणः ॥ १९ ॥ नव मनः स्ववशे वा न वेत्यपृच्छति ॥ यस्यात्मा म
नः अनुवशः अनुवर्ती अधीनः स्यात् ॥ तस्य वशगा इमे सर्वे भवंति ॥ किं च लोकाश्च तस्य वलिं यच्छंति ॥ २० ॥ ॥

भा० ४० नगरहे संमतां नवद्कमतां ॥ यद्वा गृहिण्येव गृहं न भार्य्येति संमतामित्यर्थः ४० दास्याः दासीय यात यावयं दुर्भगाः

५२ ४१ नसंमता हृत्विजीवनंयासा ४२ विद्वेषेणानष्टामतिर्यासांताः गरविषं दुर्मर्षाः असहमानाः ४३ ४४ धात्री

धिगप्रज्ञां स्त्रियं पापां पत्युश्चागृहसंमतां ॥ सप्रज्ञाभिः सपत्नीभिर्दासीमिव तिरस्कृतां ॥ ४० ॥ दासीनां को
नु संतापः स्वामिनः परिचर्य्यया ॥ अभीक्ष्णं लभमानानां दास्या दासीव दुर्भगा ॥ ४१ ॥ एवं दंदह्यमानानां
सपत्न्याः पुत्रसंपदा ॥ राज्ञः संमतपत्नीनां विद्वेषो बलवानभूत् ॥ ४२ ॥ विद्वेषनष्टमतयः स्त्रियो दारुण
चेतसः ॥ गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ॥ ४३ ॥ कृतद्युतिरजानंती सपत्नीनामघं महत् ॥ सुप्त एवेति
संचिंत्य निरीक्ष्याचरद्गृहे ॥ ४४ ॥ शयानं सुचिरं बालमुपधार्य्य मनीषिणी ॥ पुत्रमानय मे भद्रे इति धात्री
मचोदयत् ॥ ४५ ॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् ॥ प्राणेंद्रियात्मभिस्त्यक्तं हतोस्मीत्यपतत् ॥ २४
द्भुवि ॥ ४६ ॥ तस्यास्तदाकर्ण्य च चोच्चैः शातुरं घ्नंत्याः कराभ्यामुरसुच्चकैरपि ॥ प्रविश्य राज्ञी त्वरयात्मजा मा० ४
ति कं ददर्श बालं सहसा मृतं सुतं ॥ पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहांबरा ॥ ४७ ॥ २४
ततो नृपांतःपुरवर्तिनो जना नराश्च नार्य्यश्च निशम्य रोदनं ॥ आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्य
लीकहृद्दुःकृतागसः ॥ ४८ ॥

स्तन्यदायिनी ४५ उत्तारके तारके कनीनिके ययोस्ते लोचने यस्य तं ४६ विभ्रष्टाः शिरोरुहा अंबरे च यस्याः सा ४७ ता ५२

३० शूरसेनानामीशस्य तेजसा वीर्येण यो गर्भः स ववृधे ॥ ३१ ॥ ३२ ॥ जातकं जातकर्म ॥ ३३ ॥ अर्वुदं शतकोटयः ॥ वेदे तु कोटिरर्-
वुर्दं नियुतं च प्रयुतं चार्वुदं चेति प्रयुतानंतराण्यर्वुदं शास्त्रे ॥ ३४ ॥ धन्यं धनकरं आयुष्यं आयुःकरं कांक्षमान इति शेषः ॥ ३५ ॥

सापि तत्प्राशनादेव चित्रकेतोरधारयत् ॥ गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजं ॥ ३० ॥ तस्या अनुदिनं ग-
र्भः शुक्लपक्ष इवोडुपः ॥ ववृधे शूरसेनेश तेजसा शनकैर्नृप ॥ ३१ ॥ अथ काल उपावृत्ते कुमारः समजायत ॥
जनयंच्छूरसेनानां शृण्वतां परमां मुदं ॥ ३२ ॥ हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः ॥ वाचयित्वाशिषो
विप्रैः कारयामास जातकं ॥ ३३ ॥ तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ॥ ग्रामान् हयान् गजान् प्रादाद्धे-
नूनामर्वुदानि षट् ॥ ३४ ॥ ववर्ष कामानन्येषां पर्जन्य इव देहिनां ॥ धन्यं यशस्यमायुष्यं कुमारस्य महामनाः
॥ ३५ ॥ कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः ॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्द्धत ॥ ३६ ॥ मातुस्त्व-
तितरां पुत्रे स्नेहो मोहसमुद्भवः ॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥ चित्रकेतोरतिप्रीतिर्य-
था दारे प्रजावति ॥ न तथान्येषु संजज्ञे बालं लालयतोऽन्वहं ॥ ३८ ॥ ताः पर्यतप्यन्नात्मानं गर्हयंत्योऽभ्यसू-
यया ॥ आनपत्येन दुःखेन राज्ञोऽनादरणेन च ॥ ३९ ॥ ॥ ऽऽ ॥ ऽऽ ॥

३६ मोहस्यास समुद्भवो यस्मिन् ॥ प्रजाकामरूपो ज्वरस्तापः ॥ ३७ दारमित्येकवचनमार्षं ॥ ३८ ॥ आनपत्येन अपुत्रत्व

 ननु जीवः कर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराधस्तत्राह ॥ नहीति ॥ पुत्रो जीवत्येव पिता म्रियते पितरि जीवत्येव
 पुत्रो जायत इति क्रमो नास्ति ॥ कर्माधीनत्वादिति चेत्तर्ह्यात्मकर्मभिरेव तज्जन्मादि मस्तु किं त्वया कृत्यं ॥ ननु मयेश्वरेण
विनाजडैः कर्मभिरिदं कथं सिद्ध्येत ॥ भवतु नाम तथापि निजसर्गवृद्धये त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव
२१
नहि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते
तमिमं विवृश्चसि ॥ ५३ ॥ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं ॥ अंजस्त
रेम भवताप्रजदुस्तरं यद्ध्वांतं न याह्यकरुणेन यमेन दूरं ॥ ५४ ॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामा
ह्वयंति नृपनंदन संविहर्तुं ॥ सुप्तश्चिरं ह्यशनया च भवान् परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां
॥ ५५ ॥ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं ॥ किं वा गतोऽस्यपुनरन्वय
मन्यलोकं नीतोऽघृणेन न शृणोमि कला गिरस्ते ॥ ५६ ॥
विवृश्चसि छिनत्सीत्यादि क्रोशंति नह्येवंविधं दुःखं
दृष्ट्वा कश्चिदपि पुत्रादिस्नेहं करिष्यतीति भावः ॥ ५३ ॥ अप्रजदुस्तरं ॥ अकरुणेन सह ॥ ५४ ॥ अशनया क्षुधा ॥ ५५ ॥
तनूज हे पुत्र ॥ नाहं प्रथमं त्वत्पार्श्वमागतासती ॥ तव मुग्धस्मितं वक्त्रं न ददृशे न दृष्टवत्यस्मि ॥ इदानीमपि गिरो न शृ
णोमि ॥ तर्हि किं अपुनरन्वयं ॥ पुनरागमनं यथा न भवति तथा गतोऽसि ॥ ५६ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

अलक्षितः अंतकः मृत्युर्हेतुर्यस्य तं ॥ अनुगताः प्रकृतयोऽमात्यादयः यस्य सोऽनुप्रकृतिः ॥ वाष्पकलाभिः अश्रुविंदुभिरु
परोधतः संवृतत्वेन निरूढः कंठो यस्य ॥ ४९ ॥ उरसु चार्पितं ॥ वकुशोकेन व्याप्त एकमेव संततिरूपं ॥ ५० ॥ विगलंत्यः स्रजो
येभ्यः तान्केशान् ॥ ५१ ॥ आत्मसृष्टेः प्रतिरूपं अननुरूपं चेष्टसे तदेवाह ॥ नु अहो परे वृद्धे जीवंति अपरस्य वालस्य

श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रतपन्स्खलन्पथि ॥ स्नेहानुबंधेधितया सुवामृशं विनृष्टि
तोऽनुप्रकृतैर्हि जैर्वृतः ॥ पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहावरः ॥ दीर्घं श्वसन् बाष्पकलो
परोधतो निरूढकंठो न शशाक भाषितुं ॥ ४९ ॥ पतिं निरीक्ष्योरसु चार्पितं तदा मृतं तं च बालं सुतमेकसंतति
जनस्य राज्ञी प्रकृतेस्त्वहदुःजं सतीदधा नाविललाप चित्रधा ॥ ५० ॥ स्तनद्वयं कुंकुमगंधमंडितं निषिंचती
सांजनवाष्पविंदुभिः ॥ विकीर्य केशान्विगलत्स्रजः स्फुटं सुशोच चित्रं करुणस्वरं ॥ ५१ ॥ अहो विधा
तस्त्वमतीव बालिशो यस्त्वात्मसृष्टप्रतिरूपमीहसे ॥ परे तु जीवंत्यपरस्य यान्तीति विपर्ययश्चेत्
त्वमसि ध्रुवः परः ५२ ~~त्वमतीव सकरुणाः ॥ ५२ ॥~~

मृतित्वात् ॥ तदा हि वृद्धस्य सृष्टिसामर्थ्याभावे वाले च मृते सति तव सृष्टिर्नष्टा दित्यर्थः ॥ सांप्रतं स्वसृष्टेर्विपरी
तोऽस्मीति चेत्तत्राह ॥ विपर्ययः विपरीतोऽसि चेत्तर्हि त्वं प्राणिनामति दुःखकारित्वात् ॥ ध्रुवो नित्यः परशत्रुरसि
न तु कृपालुरित्यर्थः ॥ ५२ ॥

तथापि तं कालं मम पुत्रो नाभूत् । वार्द्धके जाते मत इति दुःखं इति चेत्तत्राह । यथा धानासु वीजेषु धानाः वीजांतराणि
भवंति । कासुचित् क्वचित् न भवंति नोत्पद्यंते नश्यंति च । ननु भवंत्येव तिष्ठंत्येवेति वा नियमः । एवमेवं भूतानि पुत्रा
दिरूपाणि भूतेषु पित्रादिषु । अतो धानानां जन्यजनकत्वेपि यथा पितृपुत्रादिभावो नास्ति । एवमत्रापि इति न शोकः का
र्य इति भावः । ईशमायया प्रेरितानामेव भवनमभवनं न वस्तुतः ॥४॥ तस्य च सर्वसाधारणत्वात् न पुत्र एव शोचनीयः
इत्याह तु । वयं चेति । तुल्यकाल वर्त्तमानकालीनाः जन्मनः प्राक् मृत्योः पश्चाच्च यथा न संति । एवमधुनापि न संत

यथा धानासु वै धाना भवंति न भवंति च । एवं भूतेषु भूतानि चोदितानीशमायया ॥४॥ वयं च त्वं च ये चे
मे तुल्यकालाश्चराचराः । जन्ममृत्योर्यथा पश्चात्प्रागेवमधुनापि भोः ॥५॥ भूतैर्भूतानि भूतेशः सृजत्य
वति हंत्यजः । आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि वालवत् ॥६॥ देहेन देहिनो राजन्देहाद्देहोभिजायते ॥ वी
जादेव यथा वीजं देह्यर्थ इव शाश्वतः ॥७॥

च

नैर

भो राजन् आद्यंतयोरसत्वात्स्वप्नवदित्यर्थः ॥५॥ असत्वे कथं प्रतीतिः । कथं वाहमस्य जनक इत्यभिमानस्तत्राह तु । भूतैरि
ति । ईश्वरेण मायया सृष्टत्वात्प्रतीतिः । निमित्तमात्रत्वेनैव च भूतानामयमभिमान इति भावः । नन्वीश्वरस्य सृष्ट्यादिभिः
साध्यमस्ति चेत् । अपूर्णकामता प्राप्ता नास्ति चेत् कुतः प्रवृत्तिस्तत्राह तु । अनपेक्षोपि वालवल्लीलया करोतीति ॥६॥ अ
पि च जनादिव्यवहारो देहानामेव न त्वात्मन इत्याह तु । देहिनः पितुर्देहेन पुत्रस्य देहो मातुर्देहाच्चाभिजायते । य
था वीजादेव वीजं जायते । देही तु शाश्वत एव । अर्थ इव भूम्यादिवत् इति ॥७॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ५४

५७ ॥ पूच ॥ पूर्ण ॥ इति षष्ठे चतुर्दशः ॥ १४ ॥ ततः पंचदशे चित्रकेतोः शोकापनोदनं ॥ कृततत्त्वोपदेशेन नारदेनांगिरो
युजा मृतकोपांते सवसमीपे ॥ १ ॥ त्वं चास्य वंधुर्लोकतमः स्रष्टा प्रजारूपाया अयं पुत्रः अहं चास्य पितेति चेत्तत्राहुः
श्रीशुक उवाच ॥ विलपंत्या मृतं पुत्रमिति चित्रविलापनैः ॥ चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ॥ ५७
तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः ॥ रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ५८ ॥
एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ॥ ज्ञात्वांगिरा नाम मुनिराजगाम सनारदः ॥ ५९ ॥ इति
श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां षष्ठस्कंधे चित्रकेतूपाख्याने नाम चतु
र्दशोध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ ऊचतुर्मृतकोपांते पतितं मृतकोपमं ॥ शोकाभिभूतं राजानं बो
धयंतौ सदुक्तिभिः ॥ १ ॥ कोयं स्यात्तव राजेंद्र भवान्यमनुशोचति ॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः
परं ॥ २ ॥ यथा प्रयांति संयांति स्रोतोवेगेन वालुकाः ॥ संयुज्यंते वियुज्यंते तथा कालेन देहिनः ॥ ३
पुरेति ये पूर्वजन्मनि पित्रादिरूपेण संयुक्ताः चासन् त एव मरणेन ततो वियुक्ताः संतो वर्त्तमानजन्मनि कदाचित्तस्यैवा
